# A DESCRIPTIVE CATALOGUE
OF THE
# SANSKRIT MANUSCRIPTS
IN
# H. H. THE MAHARAJAH'S PALACE LIBRARY
## TRIVANDRUM.

---

EDITED
BY
K. Sāmbaśiva Śāstrī,
Curator for the Publication of Oriental Manuscripts,
TRIVANDRUM

---

Published under the authority
of the Government of
H H THE MAHARAJAH OF TRAVANCORE.

---

## VOL. IV.

Jyotisa, Vaidyaka, Mantra, Tantra, Śilpa, and Stuti.

---

PRINTED AT THE
V V PRESS BRANCH, TRIVANDRUM
1938

(All Rights Reserved)

# CONTENTS.

# ABBREVIATIONS.



| | |
|---|---|
| CC. | Catalogus Catalogorum. |
| COL | Curator's Office Library, Trivandrum |
| CSM, Adyar | Catalogue of Sanskrit Manuscripts, Adyar Library |
| CSMBM. | Catalogue of Sanskrit Manuscripts, British Museum. |
| DCSM. Madras | Descriptive Catalogue of Sanskrit Manuscripts, Madras. |
| MPL | H H. The Maharajah's Palace Library, Trivandrum |
| N S Press. | Nirnaya Sāgara Press, Bombay. |
| SVSLS. | Śrī Vañcisetu Laksmī Series, Trivandrum. |
| TCM | Triennial Catalogue of Manuscripts, Madras. |
| TSS. | Trivandrum Sanskrit Series. |
| V.V Press, Śrīrangam. | Vāni Vilāsam Press, Śrīrañgam. |



# PREFACE.

This fourth volume comprises descriptive notices of 320 works (Nos 969—1288) commencing from *Pāṭhya* on *Jyotisa* and ending with *Parameśvarīstava* on *stuti* Apart from the celebrity of the treatises embodied herein, they are of immense service in view of the remarkable variations in reading occurring passim. It is proposed to add in the last volume of the catalogue, a comprehensive index of the authors and their works referred to in the successive issues, giving insight into the details, historic thematic and palæographic, as a result of research and investigation brought to bear on each work.

Trivandrum,
5—8—1113.

K. Sāmbaśiva Śāstrī,
Curator.

# DETAILED CONTENTS

OF

# WORKS NOTICED IN VOL. IV.

## JYOTIṢA *(continued)*



## VAIDYAKA.

---

## MANTRA.



## TANTRA AND ŚILPA.

## STUTI.

॥ श्री ॥

# A DESCRIPTIVE CATALOGUE
## OF THE
# SANSKRIT MANUSCRIPTS
## IN
# H. H. THE MAHARAJAH'S PALACE LIBRARY
## TRIVANDRUM.

---

## ॥ ज्योतिषम् (अनुवृत्तम्) ॥

## ॥ पाठ्यम् (होराव्याख्यानम्) ॥

### 892. PAṬHYAM.

Commentary on Horā.

Substance—Palm leaf. Size—$15\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—134. 9 lines per page and 40 letters per line. Script—Malayālam. No. of Granthas—3000.

Subject—*Phalabhāga* in astrology.

Beginning

श्रीमहागणपतये नमः ।

श्रीसूर्यादिसर्वग्रहेभ्यो नमः । अविघ्नमस्तु ।

मूर्तित्वे परिकल्पितः शशभृतो वर्त्म पुनर्जन्मना-
मात्मेत्यात्मविदां क्रतुश्च यजतां भर्तामरज्योतिषाम् ।
लोकानां प्रलयोदयस्थितिविभुश्चानेकधा यः श्रुतौ
वाचं नः स दधातु नैकाकिरणस्त्रैलोक्यदीपो रविः ॥

नित्यमधस्थस्येन्दोर्भानोर्भाभिः सितं भवत्यर्धम् ।
स्वच्छाययान्यदसितं कुम्भस्येवातपस्थस्य ॥

सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम् ।
क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः ॥

त्यजतोऽर्कतलं शशिनः पश्चादवलम्बते यथा शौक्ल्यम् ।
दिनकरवशात् तथेन्दोः प्रकाशतेऽधःप्रभृत्युदयः ॥

प्रतिदिवसमेवमर्कात् स्थानविशेषेण शौक्ल्यपरिवृद्धया ।
यावत्पूर्णान्तमसः (त?)कार्श्यं चार्कस्य सन्निकर्षवशात् ॥

वर्त्म पुनर्जन्मनाम्

द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
परिव्राड् योगयुक्तश्च रणे चा(पि ? भि)मुखो हतः ।

चशब्दस्य—

यस्योदये जगदिदं प्रतिबोधमेति
मध्यस्थिते प्रसरति प्रकृतिक्रियासु ।
अस्तं गते स्थितिलवोच्छ्रसितैकमात्रं
भास्वान् स एष जय (जि) त्यकटप्रभावः ॥

End :

... ... न चेन्मृत्यौ पापौ लग्नसराधिपौ ।
अन्योन्यवीक्षिते मित्रे सम्बन्धस्यानुकारिणौ ॥
वि ... ... प्रश्नकाले तु रुदितो व्याधितोऽथवा ।
कौशिकश्चाङ्गहीनश्च कृष्णश्च न शुभावहः ॥
अभ्यङ्गी क्षुधितोऽमत्रो मुक्त ... ... वासितः ।
भुजङ्गनग्नत्रस्ता वा निकटे न शुभावहः ॥
कलहो रिक्तकुम्भश्च काष्ठः प्रव्राजितस्तथा ।
कपटाचार .. ... ... ॥

Colophon .

इति होरापाठ्ये नाभमयोगाध्यायो द्वादशः ।

Author :

Remarks—The Ms. comprises nearly 30 chapters. Several leaves in the middle are decayed. Four leaves embodying certain verses on *Praśna* bring this codex to a close.

---

## ॥ प्रश्नज्ञानम् (आर्यासप्ततिः) ॥

### 893. PRAŚNAJÑĀNAM

(Āryāsaptati )

Substance—Palm leaf. Size—15″ × 1¾″. Leaves—4, 9 lines per page and 46 letters per line,

Script—Malayālam. No. of Granthas—100. Complete.

Subject—Prognostication by means of *Praśnas.*

Beginning:-

हरिः ॥

रविशशिकुजबुधगुरुसितरविजगणेशान् प्रणम्य भक्त्यादौ ।
वक्ष्येऽहं स्पष्टतरं प्रश्नज्ञानं हिताय दैवविदाम् ॥
दशभेदं ग्रहगणितं जातकमवलोक्य निरवशेषं(मपि?) यः ।
कथयति शुभमशुभं वा तस्य न मिथ्या भवेद् वाणी ॥

End:

तस्मात् प्रागवत् प्रवदेत् पृच्छासमये शुभाशुभं सर्वम् ।
कालस्य च विज्ञानादेतच्चिन्त्यं बहु प्रश्ने ॥

Colophon

आर्यासप्ततिः समाप्ता ।

Author—Bhattotpala.

Remarks—The Ms. contains 70 stanzas in Āryā metre

---

## ॥ प्रश्नज्ञानम् (आर्यासप्ततिः) ॥

## 8?4 A. PRAŚNAJÑĀNAM.

(Āryāsaptati.)

Substance—Palm leaf. Size—12″ × 1⅝″. Leaves—6. 8 lines per page and 36 letters per line.

Script—Malayālam. No. of Granthas—100. Complete.

Subject, Beginning, End—Same as No. 893.

Colophon :

हरिः ।

इति भट्टोत्पलेन रचिता आर्यासप्ततिः समाप्तः ।

भट्टोत्पलेन शिष्यानुकम्पया समवलोक्य शास्त्राणि ।

आर्यासप्तत्येदं प्रश्नज्ञानं समासतो रचितम् ॥

Author—Same as No. 893.

Remarks—The verse seen in the colophon discloses the identity of the author.

---

## ॥ अष्टवर्गप्रयोगः ॥

### 894 B. AṢṬAVARGAPRAYOGA.

Substance—Palm leaf. Size—12′ × 1⅝″. Leaves—9. 8—9 lines per page and 38—42 letters per line. Script—Malayālam. No of Granthas—200. Complete.

Subject—Astrological Science.

Beginning :

हरिः श्रीः ॐ । श्रीगणपतये नमः ।

अथाष्टवर्गप्रयोग उच्यते ।

पुत्रो वासो दधानः स्यात् । गोप्तानये कारवः सन्दधानः स्यात् ।

गोमतो धनपात्रम् । शेषो धन्यः तथार्थः । पुरवामो हि धनिकः ।
गौर्वित्तानां परं रवेः । गुप्तिः सदानये ।

End:

एवं ग्रहाणां सर्वेषां दशां कुर्यात् पृथक् पृथक् ।
अष्टवर्गदशामार्गं सर्वेषामुत्तमोत्तमम् ॥
केन्द्रं ... ... तत्स्थे शशिनि ग्रहसंयुतेऽष्टवर्गेण ।
आयुर्दायं कुर्याद् दशमस्थे क्रूरसौरयुतैः ॥

Colophon

(इदं ? अयं) भिन्नाष्टवर्गप्रयोगन्यायः ।

Author .

Remarks—The work points out the method of calculating the *Aṣṭavarga* and the effects arising therefrom.

---

## ॥ जातकसारकेरलभाषा ॥

### 894 C. JĀTAKASĀRAKERALABHĀṢĀ.

Substance—Palm leaf. Size—12″ × $1\frac{5}{8}$″. Leaves—12. 7—8 lines per page and 40 letters per line. Script—Malayālam. No. of Granthas—240. Complete.

Subject—Same as No. 876 A.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

തിങ്കളും തുമ്പയും ചൂടിൻറപ്പൻെറ മുമ്പിലെ മകൻ
മമാനമുകർ നാള്ളപ്പൻ അകലശ്ലോകകാപാദഃ
വക്ഷ്യേ നമസ്കരിച്ചിട്ടു വിജ്ഞാത്രം ഭൂതനാഥനെ
ബാലാനാം പൊരുന്നംമാത്രം ഭാഷാസംഗ്രഹമിത്യഹം

चक्रार्द्धं मृतिवैधृतञ्च गुळिकः सन्ध्याहिमस्तं विषं
गण्डान्तं नवदोषकेतुजननं सायाह्नमेकार्गळम् ।
संक्रान्तिग्रहणञ्च दग्धमशनिर्विष्टयुल्कभूकम्पनं
षड्दोषं बहुलञ्च याम्यमयनञ्चोष्णञ्च शुक्रेक्षणम् ॥

End :

ഉത്രാടമുത്രം മകമത്ഥബുധ്യംനി മിത്രജപൂയം വസുവാരിധീശം
പറവൂം കിണററിനിഫ ശുക്രനൊക്കം പററാത്ര ദശാഷ്ടമി-
രിക്തവില്ലും.

പററാ കുജാക്കവാരശ്ച വേധവും കൂപകർമ്മണി
ജലാശി ശുഭം തത്ര ജലവൃദ്ധിമപേക്ഷിതം.
മീനം കക്കടകം കുംഭം മകരം തൌലി വൃശ്ചികം
ഇടവം കഥിതാഃ സദ്ഭിരിത്യേതേ ജലരാശയഃ.

Colophon :

इत्येवं कूपतटाकविधिः ।
मन्दायुः श्लोकसंख्यायुर्वासुदेवेन निर्मितम् ।
പള്ളിമൻറു ഗൃഹം ദേശം ചൊല്ലിൻറു കണ്ണമങ്ങലം
श्रीकण्ठनाम्ना लिखितमिदं पुस्तकम् ।
भाषासंग्रहं समाप्तम् । हरिः ।
उदये पञ्चमे षष्ठे सप्तमे च भवे व्यये ।
एषु भेषु गतश्चन्द्रो जलवृद्धिं करोति च ॥
വ്യോലിയെററം.

श्रीकृष्णाय नमः । ह्रीं नमः । शिवाय नमः ।

Author—Vāsudeva.

Remarks—The work describes the *Jātakaphala*, *Upanayanavidhi* etc. in Malayālam. Both its opening sentence and the colophon bear out that it is also known by the title of Bhāṣā-sangraha

---

॥ क्षुरिकालक्षणम् ॥

894 D. KSURIKĀLAKṢANAM

Substance—Palm leaf. Size—$12'' \times 1\frac{5}{8}''$. Leaves—7. 8 lines per page and 32 letters per line. Script — Malayālam. No. of Granthas—100 Incomplete.

Subject—Prognostication by means of क्षुरिका

Beginning:

शिवम् । हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

तृतीयपर्वपर्यन्तं मानं यत् स्यादनामिकम् ।
ज्ञात्वा तेनैव मानेन क्षुरिकां मुष्टिवर्जिताम् ॥
प्रमाय या भवेत् संख्या तां द्विग्भिर्नवभिस्त्रिभिः ।
नवभिः सप्तभिश्चापि चतुर्भिश्च क्रमेण तु ॥
निहत्य रविभिः शक्रैरष्टभिस्तिथिभिस्तथा ।
त्रिघनैर्मुनिभिश्चापि हृत्वा त्वायादि लक्ष्यते ॥

आयो व्ययश्च योनिश्च तिथिद्वस्रादिकारकाः ।
अर्कादिवाराश्चायुस्तु षण्णामेषां समुच्चयः ॥
इति ।
व्ययो नायार्थमाहन्ति रिपूनायुश्चमाप्नुते ।
तदर्थमिति विद्वद्भिर्गीयते शस्त्रलक्षणे ॥

End:

प्रश्नकाले धनक्षेत्रं यदि शस्त्रस्य जन्मभम् ।
परशस्त्रं वारयितुं तदा नालमदः खलु ॥
तज्जन्मभं यदि भवेद् दृग्द्वयसमान्वितम् ।
शस्त्रान्तरात्तदा बाधा नास्य शस्त्रस्य सम्भवेत् ॥
कण्ठे परशस्त्राणि कथञ्चन निवारयेत् ।
अतीव दीर्घं शस्त्रं स्यान्न बाहुश्चेद्विपर्ययः ॥
अतीतायां तु शर्वर्यां यादृशं तु सुभोजनम् ।
शस्त्रिणोऽपि तथा वाच्यं शस्त्रलब्धौ तथापि वा ॥

Colophon:

Author:

Remarks—The work attempts to divine the results in battle from the weapons used. It is a portion of an eminent astrological treatise.

---

## ॥ प्रश्नज्ञानम् ( आर्यासप्ततिः ) ॥

## 895. PRAŚNAJÑĀNAM (ĀRYĀSAPTATI).

Substance—Palm leaf. Size—$14\frac{1}{8}'' \times 1\frac{7}{8}''$. Leaves—8. 6 lines per page and 36 letters per line.

Script—Malayālam. No. of Granthas—108 Complete.

Subject etc.—Same as No. 893.

Remarks—The following verse

यत्पदपद्मद्वन्द्वं स्मरतां सिध्यत्यभीष्टमरुगं तम् ।
दहनप्लावनदक्षैः करैः प्रकाशीकृताखिलं वन्दे ॥

occurring in the introductory portion is a later addition

---

॥ प्रश्नसारसमुच्चयः ॥

## 836. PRAŚNASĀRASAMUCCAYA.

Substance—Palm leaf. Size—11" 1½". Leaves—16. 8 lines per page and 36 letters per line Script—Malayālam. No. of Granthas—275 Incomplete.

Subject—Astrological prognostication by means of *Āyūḍhalakṣaṇa*

Beginning:

प्रणिपत्य गणेशानं ज्ञानमूर्तिं दिवाकरम् ।
प्रश्नशास्त्राणि चालोक्य वक्ष्ये सारसमुच्चयम् ॥
अर्णैर्वाक्यैश्च चेष्टाभिर्ग्रहराश्यादिभिस्तथा ।
अतीतानागतफलं विदध्याद् विधिवद् बुधः ॥
प्रश्नाक्षराणि गणयेत् ततः पञ्चभिराहरेत् ।
शेषेषु विषमे नष्टः समे चिन्ता तु कथ्यते ॥

पृच्छकस्याशुभं वाक्यं कोणे पृष्ठे च संस्थितिः ।
पृष्ठे स्पर्शो गौळिशब्द ऋग्रान्त्यं नटसूचकम् ॥

End:

अथ सद्भिरुक्तमेवमन्यद्वक्ष्याम्यतो जलज्ञानम् ।
पूर्वोक्तचन्द्रगुप्ति बहुपंचाद्दाइ द्रढीकर्तुम् ॥
पूर्वमदुक्तोपायैः सामान्येनाम्बु निश्चित्य ।
देशविशेषविनिश्चयम ... ...

Colophon.

Author:

Remarks—The Ms. is damaged.

---

## ॥ प्रश्नसारसमुच्चयः ॥

### 897 A. PRAŚNASĀRASAMUCCAYA.

Substance—Palm leaf. Size—17″ × 2″. Leaves—10. 11 lines per page and 52 letters per line. Script—Malayalam. No. of Granthas—300. Complete

Subject—Beginning—Same as No. 896.

End:

मूर्तिस्मत्रं भक्ष्यं भोज्य भोजयितृ भाग्रमुपदंशम् ।
सेचनमन्नं सहभुक् पूर्तिकथा शयनमपि विलग्नाद्याः ॥

Colophon :

सारसमुच्चयः समाप्तः ।

Author ;

Remarks—The leaves are worn out.

---

## ॥ होराषट्पञ्चाशिकाविवृतिः ॥

### 897 B. HORĀṢAṬPAÑCĀŚIKĀVIVṚTI

Substance—Palm leaf. Size—17″ × 2″. Leaves—3½. 11 lines per page and 52 letters per line Script—Malayālam. No of Granthas—100. Incomplete.

Subject—Prognostication by means of planetary position.

Beginning:

प्रणिपत्य रविं मूर्ध्ना वराहमिहिरात्मजेन सद्यशसा ।
प्रश्ने कृतार्थगहना परार्थमुद्दिश्य पृथुयशसा ।
च्युतिर्विलग्नाद्धिबुकाच्च वृद्धि-
मध्यात् प्रवासोऽस्तमयान्निवृत्तिः ।
वाच्यं ग्रहैः प्रश्नविलग्नकाले
गृहं प्रविष्टो हिबुके प्रवासी ॥

End.

अष्टमाविरातिस्थिरराशयन्तं लग्नादष्टमाष्टमाच्च गणयित्वा
तत्संख्यासंवर्गसमानमायुः कालप्रवेशं वक्तुं.... ....

Colophon :

इति षट्पञ्चाशिकाविवृतावष्टमोऽध्यायः ।

Author—Bhaṭṭotpala.

Remarks—Two lines in Malayālam beginning with "ആദിത്യൻനിൻറനാഠം തുടങ്ങി" bring the Ms. to an end.

---

## ॥ प्रश्नसारसमुच्चयः (केरलभाषाव्याख्योपेतः) ॥

### 893. PRAŚNASĀRASAMUCCAYA
with Malayālam commentary.

Substance—Palm leaf Size—8½" × 2". Leaves—19 8 lines per page and 28 letters per line Script—Malayālam. No. of Granthas—275. Incomplete.

Subject—Same as No. 896.

Beginning :

प्रणिपत्य गणेशानं ज्ञानमूर्तिं दिवाकरम् ।
प्रश्नशास्त्रं समालोक्य वक्ष्ये सारसमुच्चयम् ॥

എൻറതിനപൊരുൾ अहं गणेशान प्रणिपत्य सारसमुच्चय वक्ष्ये -ഗണേശാനനെ പ്രണിപതിച്ചിട്ടു എൻെറ നമസ്കരിച്ചിട്ടു സാരസമുച്ചയത്തെ ചൊല്ലി ..ണ്ട — ज्ञानमूर्तिं दिवा-करम् എൻ ജ്ഞാനസ്വരൂപനായിരിക്കിൻെറ ആദിത്യനെയു നമസ്കരിച്ചിട്ടു-प्रश्नशास्त्रं समालोक्य പ്രശ്നശാസ്ത്രങ്ങളെ അഴകനായി ആലോചനം ചെയ്തിട്ടു കണ്ടിട്ടു പ്രശ്നശാ

സ്സും എന്ന ജാതിയിങ്കലേകവചനം. സാഃസമുച്ചയമെൻറ സാരങ്ങളുടെ കൂട്ടമെൻറവാറു അരെങ്ങ്ഗ്നിത്യാദി

End

ഗ്രഹങ്ങളുടെ യോഗത്തിന്ന തക്കവെണ്ണം ചൊല്ലുകില്ലു२००-എ ൻറവാറു-भौमाच्छभौमभुजगमन्देन्दुबुधमन्त्रिणः ... .. ..

Colophon ·

Author

Remarks—The Ms is damaged.

---

## ॥ प्रश्नानुष्ठानपद्धतिः ॥

### 899. PRAŚNĀNUṢṬHĀNAPADDHATI.

Substance—Palm leaf. Size—18″ × $1\frac{7}{8}$″. Leaves—23. 8 lines per page and 60 letters per line. Script—Malayālam. No of Granthas—700 Complete.

Subject—Prediction of longevity and kindred topics by means of *Praśnas*

Beginning

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
अस्तु त्रैलोक्यदीपाय भक्ताभिमतदायिने ।
समस्तविद्यानिर्माणकवये रवये नमः ॥
स्वस्थचित्तो विविक्तस्थः समभ्यच्यं गणाधिपम् ।
निजान् गुरून् देवताश्च सूर्यादींश्च नवग्रहान् ॥

सूर्याभिमुखमासित्वा मौनी सम्यग्घृदीश्वरम् ।
ध्यायन्नाऽोच्य शकुनान् प्रश्नं प्रारभतां बुधः ।

End:

अकच्टतपय(श)वर्गाश्चन्द्राद्यर्कान्तरसतुल्याः ।
सास्थनि दंशे स्पर्शो नेष्टः शिद्देषु गुद्दजलम् ।
मांसाढ्ये पङ्कयु ं फले पाषागसंयुक्तम् ।
इति लक्षणमिदमुक्तं पूर्वैः किञ्चित् क्रमान्मया लिखितम् ॥
आयुर्विवादसन्ततिकार्यागमयुद्धकूपानाम् ।
प्रायःशास्त्रनिरुक्तैः पद्यैः कैश्चिन्मया निबद्धैश्च ॥
अवधारणाय लिखिता प्रश्नानुष्ठानपद्धतिः कापि ।

Colophon :

प्रश्नानुष्ठानपद्धतिः समाप्ता । .... .... ... ,... .... ....

शुभमस्तु ।

नलप्रतोयं सूर्याहर्गणदिने वासुदेवेन लिखितं समाप्तमिदं पुस्तकम् । हरिः श्रीगुरुभ्यो नमः ।

Author .—

Remarks—The Ms. is fairly accurate

---

## ॥ प्रश्नानुष्ठानपद्धतिः ॥

### 900 A. PRAŚNĀNUṢṬHĀNAPADDHATI.

Substance—Palm leaf. Size—8″ × 1¾″. Leaves—

55. 8 lines per page and 24 letters per line. Script—Malayālam No of Granthas—700

Subject etc —Same as No 899.

—•—

## ॥ उडुजातकोदयम् ॥

## 900 B. UḌUJĀTAKODAYAM.

Substance—Palm leaf. Size—8″ × 1¾″. Leaves—16. 7—8 lines per page and 26 letters per line. Script—Malayālam. No of Granthas—200 Incomplete.

Subject—Same as No. 876 I.

Beginning :

हरिः ।

गणेशवाग्दैवतविष्णुशङ्करा-
निनेन्दुभौमज्ञगुरूशनश्शनीन् ।
प्रणम्य पातोच्चगृहांशरुद्रणा-
नुदाहरिष्याम्युडुजातकोदयम् ॥

विज्ञाय जन्मनि खगास्थितिमृक्षहोरा-
द्रेकाणभागभसमांशकदिक्त्रयांशान् ।
जन्मायुषोरधिपयोस्तु शुभाशुभैस्तैः
संपाद्यिपत् सततमेव सता निवार्या ॥

विचिन्त्य पक्षादि तिथिं च .. व ..
दिने समोत्कृष्टलघूडुजं वदेत् ।

End

नगरयूथपुरोद्भवपूजनं
प्रवरयोषिदवाप्तिरथास्ति च ।
विविधवित्तपरिच्छदसंयुति-
र्दितिजपूजितदायगते शनौ ॥
तनयसौख्यधनाप्तनमम्पदां
निचयलब्धिरतिप्रभुताशयः ।
पवनपित्तकफार्ति(चरा?स्था)स्ति चे-
दसुरमन्त्रिदशाहृति चन्द्रजे ॥
तनयसौख्यबहिष्कृतिराग्निज
भयमतीव विनाशनमन्तरुक् ।
अपिच वा(पे ?रवधू)जनसंयुतिः
शिखिनि यात्यलमौशनसीं दशाम् ॥
गणेशवाग्दे..............

Colophon :

Author ·

Remarks—The Ms. extends up to the end of *Śukradaśā* The work is identical with No. 876 I, but is of special interest by virtue of the variants in reading.

---

## ॥ फलदीपिका ॥

### 901 PHALADĪPIKĀ

Substance—Palm leaf. Size—12″ × 1½″. Leaves—7. 8 lines per page and 36 letters per line Script —Grantha. No. of Granthas—100. Incomplete.

Subject—Horoscopy

Beginning :

सन्दर्शनं वितनुते पितृदेवनॄणां
मासाब्दवासरदलैरथ ऊर्ध्वगं यत् ।
सव्यं क्वचित् क्वचिदुपेत्यपसव्यमेकं
ज्योतिः परं दिशतु वस्त्वमितां श्रियं नः ॥

वाग्देवीं कुलदेवतां मम गुरून् कालत्रयज्ञानदान्
सूर्यादींश्च नवग्रहान् गणपतिं भक्त्या प्रणीमः(?)परम् ।
संक्षिप्यात्रिपराशरादिकथितान् मन्त्रेश्वरो दैवविद्
वक्ष्येऽहं फलदीपिकां सुविमलां ज्योतिर्विदां प्रीतये ॥

End

माणिक्यं तरणेः सुधांशुममलं मुक्ताफलं शीतगो-
र्माहेयस्य च विद्रुमं मरतकं सौम्यस्य गारुत्मतम् ।
देवेड्यस्य च पुष्यरागमसुरामात्यस्य वज्रं शने-
र्नीलं निर्मलमन्ययोश्च गदिते गोमेदवैडूर्ययोः ॥
ताम्रं कांस्यं धातुना... ... ...

Colophon

Author—Mantreśvara.

Remarks—The work is printed in Kumbhakonam.

---

## ॥ महाभास्करीयम् ॥

## 902. MAHĀBHĀSKARĪYAM.

Substance—Palm leaf. Size—14″ × 2″ Leaves—26.

5—6 lines per page and 29—43 letters per line. Script — Grantha. No. of Granthas — 400. Incomplete.

Subject—Same as No 870.

Beginning :

कलां बिभर्ति क्षणदाकरस्य यः
प्रकाशितास्ते शिरसा गभस्तिभिः ।
नमोऽस्तु तस्मै सुरवन्दिताङ्घ्रये
समस्तविद्याप्रभवाय शम्भवे ॥

जयन्ति भानोः कमलावबोधिनः
करा हिमांशोर्वनिताननान्विषः ।
मसूरितारास्फुटदीर्घरश्मयो
धरासुतज्ञार्किसितत्विषः पुनः ॥

तपोभिरार्य स्फुटतन्त्रमाश्मकं
चिरत्वमभ्येति जगत्सु सद्गुणैः ।
चिरं च जीव्यासुरपेतकल्मषा
भटस्य शिष्या जितरागशत्रवः ॥

तत्राद्रिरूपां नियुतं महीभुजां
शकेन्द्रतान्मां? गतवर्षसङ्ग्रहम् ।
द्विषट्कनिघ्न गतमाससंयुतं
युगाधिमासैर्गुणयेद्विरातम् (?) ॥

End :

विक्षेपः शशिनः कल्प्यश्छेद्यकाले मतां वरैः ।
उत्तरो दक्षिणो नित्य दक्षिणश्चोत्तरस्तथा ॥

प्रोक्तमेतदवधूय मत्सरं
सूर्यचन्द्रतमसां क्रमागतम् ।
कर्म येन विदुषां समर्पितं
दैवविद् भवति सर्वतन्त्रवित् ॥

Colophon :

इति महाभास्करीये पञ्चमोऽध्यायः ।

Author—Bhāskarācārya.

Remarks—The Ms. consists of five chapters.

---

## ॥ महाभास्करीयभाष्यम् ॥

### 903. MAHĀBHĀSKARĪYABHĀSYAM

Substance—Palm leaf. Size—20½" × 2" Leaves—47. 10 lines per page and 65—96 letters per line. Script—Malayālam No of Granthas—2750. Incomplete.

Subject—Same as No. 870

Beginning :

श्रीगणपतये नमः ।

गावो यस्य क्षमायां ग्रहगतिविषयध्वान्तविध्वंसदक्षा
येनाप्युक्ते जितैषा भगनिरि...ता?भान्ति वाग्रत्नमालाः ।
तेनोक्ते? ... निबन्धः पृथुतरगणितः कर्मणां भास्करेण
व्याख्यानं तस्य किञ्चिद् गुरुचरणयुगप्राप्तमत्या करोमि ॥

तत्र कालविघ्ननिकायोपशमनपूर्वकत्वात् क्रियानिष्पत्तेः तस्य च .....भवता नमस्काराधीनत्वात् आचार्यार्यभटाभिमतग्रहकर्मणां निबन्धनं चिकीर्षुरयमाचार्यः ....तार्थमीश्वरप्रणिपातं कृतवान् अनेन वृत्तेन—कलामित्यादिना ।

End

आचार्यार्यभटः पितामहमतं तन्त्रं सुसंक्षिप्तवान्
वृत्तिं विस्तरतोऽस्य मन्दमतये तेनाकरोद् भास्करः ।
तस्या अप्यतिदूरमेत्य सुधियामर्थं (स्त्विदानीमिति)
(व्याख्या या कलिता श्रुता गुरुमुखाद्) गोविन्दनाम्ना मया ॥

Colophon :

इति श्रीमन्महाभास्करीयस्य भाष्ये गोविन्दस्वामिकृते अष्टमोऽध्यायः ।

गोविन्देन कृता टीका गोविन्दस्वामिनामिका ।
समस्ता भास्करीयस्य गुरुव्याख्यानिबन्धना ॥
चेतः शंभोः पदाब्जस्मृतिमथ रसना तत्स्तुतिं नेत्रयुग्मं
तद्बिम्बप्रेक्षणं तद्गुणगणकथनाभिश्रुतिं श्रोत्रयुग्मम् ।
पाणी तद्वन्दने तन्निलयनगमनं पादयु .... .....
... ... ... नीलकण्ठाह्वयोऽस्य ॥

कलिसमासु वियद्द्विपभूद्वपु-
विषयवेदमितासु वृषं गते ।
वृषगुरौ वृषकेतुनिषेविणा
द्विजवृषेण समुल्लिखितो ह्ययम् ॥

अरे धरणि .. ...
... ... यपाग्गा यदिह भूषणं किञ्चन ।

मदीयभुजवेगतोऽजनि (जऽच) मातृकादोषतः
परित्यजत तत्क्षणाद् विगतकोपदुर्भाषणात् ॥

किं बहुना ... ... ... . .
गणितविदां चेतो ... . ... ...
... ... ... द्रालालङ्कृताङ्घ्रिपद्मं च ।
किं विधुना किं मधुना किं सुधया किञ्च वसुधयाखिलया ।
शिवशिवशिवशिवशिवशिवशिवशिवशिवशिवशिवेति मंलपताम् ॥
हरिः । श्रीगणपतये नमः ।

Author—Govindasvāmin

Remarks—The Ms. contains eight chapters The first eight FF. are missing The colophon proves that the Ms is nearly 400 years old.



## ॥ मुहूर्तदर्शनम् ॥

## 904 MUHŪRTADARŚANAM.

Substance—Palm leaf. Size—18″ × 1¾″ Leaves—33. 8 lines per page and 60—68 letters per line. Script—Malayālam No. of Granthas—1000. Complete

Subject—Same as No 865.

Beginning.

अविघ्नमस्तु ।
जयत्यमेयांशुनिधिर्जगत्त्रयी-
प्रबोधहेतुः सविता त्रयीमयः ।

न सर्वदर्शित्वमितो विना भवे-
दितीव यं नेत्रमधत्त शङ्करः ॥
स्वकीयशास्त्रे बहुशोऽपशब्दा-
नमी वदन्तीति जगत्प्रसिद्धम् ।
सुदुःसहं तत्परिवादशल्यं
मौहूर्तिकानामपहर्तुकामः ॥
वसिष्ठवागीश्वरगार्ग्यमुख्यै-
र्महर्षिभिर्विस्तरतः कृतेषु ।
शास्त्रेषु बुद्ध्या परिगृह्य सार
लोकोपकाराय च कीर्तये च ॥
श्रुताखिलव्याकरणोऽहमुत्तमैः
पदैरदोषैः कृतपद्यगुम्फनम् ।
विचित्रवृत्तं प्र(घु?भु)सम्मतं मता-
मिदं विधास्यामि मुहूर्तदर्शनम्म ॥
क्रमेण राशिग्रहतारकादेः
संज्ञां वयं तावदिहाभिदध्मः ।
शास्त्रार्थबोधः खलु तस्य तस्य
संज्ञामविज्ञाय जनस्य न स्यात् ॥
अजाख्यमाद्यश्च वदन्ति मेषं
राशिर्वृषो गोवृषभाभिधानः ॥

End :

करग्रहो वास्तुनिवेशनादिः परस्तु कृष्यादिविधानसंज्ञः ।
देवप्रतिष्ठापनकार्यशंसी यात्राविधानं प्रविकीर्णनामा ॥

तारादिलक्षणाख्यः पुष्पग्रहगोचरादिफलसंज्ञः ।
इति पञ्चदशाध्यायाः परिमितपद्याः क्रमेणोक्ताः ॥

Colophon.

इत्थं पञ्चदशाध्यायप्रबद्धं जयतु क्षितौ ।
मुहूर्तदर्शनं विद्यामाधवीयाह्वया चिरम् ॥

ये लोके मत्सरान्धाः परगुणविमुखा दोषसन्दर्शनोत्का-
स्तेषामेषां सकाशं न विशतु यदि मे विद्यते पुण्यलेशः ।
ये चान्येऽनिष्टदोषाः परगुणमधिकं मानयन्तो महान्तो
निर्वैराः सन्ति तेषां व्रजतु मम कृतिः सन्निधौ सन्निवासम् ॥

एतद् विद्यामाधवीयाभिधानं
ज्योतिश्शास्त्रं ये पठन्तीह मर्त्याः ।
प्रीतास्तेषामीश्वरांशा ग्रहास्ते
तन्वन्त्वायुर्वित्तविज्ञानवृद्धिम् ॥

वदन् प्रसूनं ग्रहचारशास्त्रक्रमाढ्यमाचार्यसमुद्भवं च ।
अध्याय एष त्रिगुणाष्टसर्ख्यैः श्लोकैः कृतः पञ्चदशोऽत्र पूर्णः ॥

पञ्च पञ्च महादिक्षु द्वौ द्वौ कोणेषु योजयेत् ।
कृत्तिकादिभरण्यन्तं गणयेन्मध्यरेखतः ॥

एतस्मिन्नेव रेखा प्रतिमुखभगणे शर्वरीशस्य नष्टा
शुक्रज्ञाचार्यपाता रविकुजशनयः कुर्युरेते क्रमेण ।
प्रेष्यां वन्ध्यामपुत्रां मरणमपि तथा भर्तृनाशं प्रजाना-
मल्पत्वं निर्धनत्वं परिणयनविधौ वेधदोषाः क्रमेण ॥

माधवीयं समाप्तम् । शुभमस्तु ।

पुनर्दीनः सुखी भिक्षुः शरण्यस्तत्परान्नः ।
लाभलग्नं प्रयाणज्ञो धीरोऽसौ धन एकतः ॥

Author—Vidyāmādhava

Remarks—The Ms. consists of 15 chapters and is printed in MOLS.

---

॥ मुहूर्तदर्शनम् ॥

905. MUHŪRTADARŚANAM.

Substance—Palm leaf Size—$8\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—54. 8—10 lines per page and 32 letters per line Script—Malayālam. No. of Granthas—1000. Complete.

Subject—Same as No 865.

Beginning etc —Same as No. 904.

Remarks—The leaves are much damaged and torn but the script is neat and legible.

---

॥ मुहूर्तदर्शनम् ॥

906. MUHŪRTADARŚANAM.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 2''$ Leaves—21. 9 lines per page and 40—44 letters per line. Script—Malayālam. No. of Granthas—500. Incomplete

Subject—Same as No 865.

Beginning—Same as No. 904.

End

गर्भाधान पूर्वमारभ्य पुंसां वेदोक्तं यत् प्रेतकार्यावसानम् ।
कर्मानेकं विद्यते तस्य पूर्वैरुक्तं युक्तं कीर्त्तयामो मुहूर्तम् ॥
दोषाध्यायानिरूपितान् बलयुतान् दोषानशेषांस्त्यजे-
दध्याये कथिता निजे शुभगुणा ग्राह्या यथासम्भवम् ।
अत्याज्योऽत्र गुणः शुभो हि ... ...
... ... ... ... ॥

Colophon :

इति षोडशभिस्त्रिसंगुणै रुचिरैः पद्यवरैर्विगुम्फितः ।
कृतसर्वबलाबलस्थितिर्वसितोऽध्याय इहैष पञ्चमः ॥

Author—Same as No. 904

Remarks—The Ms. contains the first five chapters and two verses in the sixth.

---

## ॥ मुहूर्तदर्शनम् ॥

### 907 MUHŪRTADARŚANAM.

Substance--Palm leaf Size—7″ × 2″. Leaves—70. 9 lines per page and 24—25 letters per line. Script—Malayālam No. of Granthas—1000.

Subject—Same as No. 865.

Beginning etc —Same as No. 904.

Remarks—The concluding portion is missing.

## ॥ मुहूर्तदर्शनम् ॥

### 908. MUHŪRTADARŚANAM.

Substance—Palm leaf Size—$13\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—45. 8 lines per page and 54—60 letters per line. Script—Malayālam No. of Granthas—1000 Complete.

Subject—Same as No 865

Beginning etc --Same as No. 904.

---

## ॥ मुहूर्तदर्शनम् ॥

### 909. MUHŪRTADARŚANAM.

Substance—Palm leaf Size—$17'' \times 2''$ Leaves—23. 8 lines per page and 48 letters per line. Script—Malayālam No. of Granthas—600 Incomplete.

Subject—Same as No. 865.

Beginning—Same as No. 904.

End

पापे विक्रमलाभशत्रुषु शुभे केन्द्रे त्रिकोणेऽपि वा
सत्कर्मा हिमगुस्त्रिकोणभवने केन्द्रे गुरुर्वा बली ।
देवाचार्यनिरूपितान् बलयुतान् श्लोकैकपादोदितान्
योगान् प्राहुरिमान् यथोक्तसमयालाभेऽपि चौले शुभान् ॥

Colophon

इति त्रिंशता ह्यबन्धैः सुपद्यै-
र्मुहूर्तागमे गुम्भितोऽध्याय एषः ।

निषेकादिचौलान्तकर्माभिधायी

समाप्तिं प्रपन्नोऽत्र षष्ठो महिष्ठः ॥

Author—Same as No. 904.

Remarks—The Ms. concludes with the 6th chapter on the purificatory rites, such as *Upanayana* etc.

---

## ॥ मुहूर्तदर्शनम् (केरळभाषाव्याख्योपेतम्) ॥

### 910. MUHŪRTADARŚANAM

with Malayālam commentary.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 2''$ Leaves—134. 11 lines per page and 26—32 letters per line. Script—Malayāḷam. No. of Granthas—2800.

Subject—Same as No. 865

Beginning

श्रीगणपतये नमः । अविघ्नमस्तु ।

जयत्यमेयांशुनिधिर्जगत्त्रयी-

प्रबोधहेतुः सविता त्रयीमयः ।

न सर्वदर्शित्वमितो विना भवे -

दितीव यं नेत्रमधत्त शङ्करः ॥

सविता जयति ആദിത്യൻ യല്ലായിലും മേൽ വൎത്തിക്കുന്നോൻ എല്ലാരെക്കാട്ടിൽ പ്രാധാന്യമെന്തന്നെടുത്തു ചൊല്ലുന്നു. जगत्त्रयीप्रबोधहेतुः ഭൂമ്യന്തരിക്ഷസ്വൎഗ്ഗവാസിജനങ്ങളുടെ

പ്രബോധത്തിനു ഹേതുവായിരി(ക്കു)ന്നു अमेयांशुनिधिः അപരിഛേദ്യങ്ങളായിരിപ്പോര ചില രശ്മികളോടുംകൂടി ഇരി(ക്കു)ന്നു. त्रयीमयः വേദസ്വരൂപിയായി(രു°രിക്കു)ന്നു. शङ्करः इतो विना सर्वदर्शित्वं न भवेदिति इव यं नेत्रं अधत्त ശ്രീപരമേശ്വരൻ യാതൊരാദിത്യനെ അല്ലാതെകണ്ടു് സവ്വദശിത്വം ഭവിക്കയില്ല എന്നിട്ടു ഇങ്ങിനെ ഇരിക്കുന്ന ആദിത്യനെ കണ്ണായി ധരിച്ചു എന്നു തോന്നും. അതുകൊണ്ടു് എല്ലാരക്കാട്ടിലും പ്രധാനനായിട്ടു ആദിത്യൻ വത്തിക്കുന്നോൻ ഇങ്ങനെ ഇഷ്ടദേവതാപ്രണാമം ചെയ്തു് തന്നുടെ ഉപക്രമത്തെ ചൊല്ലുന്നു.

End

षड्बाणार्ककुलाद्रिपङ्क्त्युदधिदिग्धात्रीमहेशस्वर-
क्षोणीलोचनपावकाष्टनवसख्यातेषु मासेष्वपि ।
शून्याख्याः प्रथमादिकास्तु तिथयः पक्षे सिते कीर्तिता-
स्त्याज्याः पञ्चदश क्रमेण ति(थयः)कृष्णद्वितीयादयः ॥

ഷട് ഭാദ്രപദമാസത്തിൽ പൂവ്വപക്ഷത്തിൽ പ്രതിപദം. അപരപക്ഷത്തിൽ ദ്വതീയ. ബാണ. ശ്രാവണമാസത്തിൽ ദ്വിതീയ. കൃഷ്ണതൃതീയ. അക്ക ഫാൽഗുനമാസത്തിൽ ശുക്ലതൃതീയ കൃഷ്ണചതുൎത്ഥി. കുലാദ്രി. ആശ്വയുജമാസത്തിൽ ശുക്ലചതുൎത്ഥി കൃഷ്ണപഞ്ചമി. പംക്തി പൌഷമാസത്തിൽ ശുക്ലപഞ്ചമി കൃഷ്ണഷഷ്ഠി ഉദധിഃ ആഷാഢമാസത്തിൽ ശുക്ലഷഷ്ഠി കൃഷ്ണസപ്തമി. ദിക് പൌഷമാസത്തിൽ ശുക്ലസപ്തമി കൃഷ്ണാഷ്ടമി. ധാത്രി ചൈത്രമാസത്തിൽ ശുക്ലാഷ്ടമി കൃഷ്ണനവമി. മഹേശഃ മാഘമാസത്തിൽ ശുക്ലനവമി കൃഷ്ണദശമി. സ്വരഃ ആശ്വയുജമാസത്തിൽ ശുക്ലദശമി കൃഷ്ണൈകാദശി. ക്ഷോണി ചൈത്രാദിമാസത്തിൽ ശുക്ലൈകാദശി കൃഷ്ണദ്വാദശി. ലോചന. വൈശാഖമാസത്തിൽ ശുക്ലദ്വാദശി കൃഷ്ണത്രയോ

ദശി. പാവകഃ ജ്യേഷ്ഠമാസത്തിൽ ശുക്ലത്രയോദശി കൃഷ്ണചതുർദശി. അഷ്ട കാർത്തികമാസത്തിൽ ശുക്ലചതുർദശി കൃഷ്ണപഞ്ചദശി. നവ മാർഗ്ഗശീർഷമാസത്തിൽ ശുക്ലപഞ്ചദശി കൃഷ്ണപ്രതിപദം. ഇവതിഥി. ശൂന്യതിഥികൾ. പൌഷമാസഃ ശൂന്യഇതി കൈശ്ചിദ്ദേശേഷു.

Colophon :

इत्थं विद्यामाधवीयाभिधाने
चत्वारिंशत्संयुतैरष्टाभिश्च ।
श्लोकैर्विद्यामाधवेनात्र शास्त्रे
संज्ञाध्यायो गुम्फितः सोऽयमाद्यः ॥

Author—Text . Same as No. 904.

Remarks—The first two leaves are not numbered The succeeding 126 leaves are separately numbered. The whole work comprises six chapters.

---

## ॥ मुहूर्तदीपकम् ॥

## 911. MUHŪRTADĪPAKAM

Substance—Palm leaf. Size—10″ × 1¼″ Leaves—36. 6 lines per page and 30 letters per line Script—Malayālam. No. of Granthas—400

Subject—Prescription of auspicious time for each religious function,

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

वन्दे सूर्यं श्रुतिमयमजं ब्रह्ममुख्यैः सुरेन्द्रै-
वन्द्यं शश्वत् सकलजगतामात्मभूतं दिनेशम् ।
देवामित्रान् निखिलजगतां धूमकेतूनजेयान्
भिन्दानं स्वैः किरणनिवहैर्नैकरश्मिं ग्रहेशम् ॥

गजास्यगोशिवगुरून् नत्वा मूर्ध्ना करोम्यहम् ।
मुहूर्तदीपकं स्वल्प स्वल्पबुद्धिहिताय वै ॥

स्वेशाभिधानैस्ताराश्च तिथयो भूतसंख्यया ।
क्वचिच्चात्र निगद्यन्ते वाराश्च स्वेशनामभिः ॥

यत्तारोपपदा सख्या यावती कथ्यते पुरा ।
सा संज्ञा तावतां भानां तदादीनामिहोच्यते ॥

End :

अश्विनीधर्मराजेशपुष्यवारुणभेषु च ।
एकोद्दिष्टं वपेत् पिण्डं चन्द्रसागरवासरे ॥

रूपाद्रिरूपदिवसे रसाब्ध्यग्निदिनेऽपि च ।
तत्तदाद्येष्वहस्सूक्तं पञ्चस्वापदि सूरिभिः ॥

पिण्डानामवसानं तु गगनाङ्गाग्निवासरे ।
सपिण्डीकरणश्राद्धं चन्द्राङ्गाग्निमितेऽहनि ॥

शुभाशुभानि कर्माणि यान्यत्रानुदितानि हि ।
तेषां कालो गुरुप्रोक्ताच्छास्त्राच्चिन्त्यो मनीषिणा ॥

श्राद्धविधिः ।

Colophon:

कश्चिद् द्विजो गुणख्यातकेशवाख्यद्विजात्मजः ।
काण्ववस्त्वाह्वयग्रामजन्मा नारायणाह्वयः ॥
इत्थं मुहूर्तदीपाख्यं मुहूर्तागमसारजम् ।
मुहूर्तदर्शनं पुण्यं सज्जनैः कृतवान् श्रुतात् ॥
मुहूर्तदीपकं समाप्तम् ॥ शिवम् ।
शङ्करेण लिखितमिदं पुस्तकम् ।
शिव शिव शिव शिव शिव.... .... .... ....

Author—Nārāyana.

Remarks—The Ms. is much damaged. The colophon discloses that the author was the son of Keśavadvija and a resident in Kāṇvavāstugrāma

## ॥ मुहूर्तदीपकम् ॥

### 912 MUHŪRTADĪPAKAM.

Substance—Palm leaf Size—8" 1½" Leaves—29. 11 lines per page and 23 letters per line. Script—Malayāḷam. No of Granthas—400.

Subject etc —Same as No. 911.

Remarks—The Ms is much decayed.

## ॥ मुहूर्तपदवी ॥

### 913 MUHŪRTAPADAVĪ

Substance—Palm leaf. Size—6"×1¼". Leaves—7.

10—12 lines per page and 22 letters per line. Script—Malayālam No. of Granthas—100

Subject—Determination of auspicious time for the performance of the sixteen purificatory rites.

Beginning

श्रीगणपतये नमः ।

प्रत्यूहप्रतिहन्तृ किञ्चन महः सञ्चिन्त्य भासां निधिं
भानुश्च क्रियते मुहूर्तपदवी संक्षिप्तशास्त्रान्तरा ।
वर्ज्यावर्ज्यविवेकिनी कृतसदाचारानुसारा मया
सन्तुष्यन्तुतरां चिराय सुधियो देवाः प्रसीदन्तु नः ॥

दोपलक्षणबलाबलादिकं ग्रन्थविस्तरभयादुपेक्ष्यते ।
तत्स्वरूपमिह संजिघृक्षते सर्वकर्मसु विवेकसिद्धये ॥

उल्कोर्वीचलनोपरागगुलिकाः सायाह्नसन्ध्यादयो
रन्ध्रान्त्यारिगतो विधुश्च सितदृक् पापाद्यावेक्षणम् ।
गण्डान्तोष्णविषं स्थिरं च करणं विष्टिश्च रिक्ताष्टमी
लाटैकार्गलवैधृताहिशिरसः सर्वत्र वर्ज्या अमी ॥

End

नालिकेरादिके वेधकुलीरालितुलाव्ययः ।
वर्ज्या ऊर्ध्वमुखाः शस्ताः केन्द्रेऽपीन्द्रपुरोहितः ॥

कुम्भपूर्तितिथिभाम्बुचन्द्रमोवृद्धिरिःफरिपुचन्द्रमन्ददृक् ।
धान्यवृद्धिशुभदं न कृत्तिका शक्रनक्रवणिगाद्यराशयः ॥

इति सुखमधिगन्तुं सन्मुहूर्तेषु दोष-
व्यतिकरपरिहारः शोधितः साधुमार्गः ।

कथमपि घटयन्तः सन्तु दोषानसन्तो
गुणमिह गणयन्तः साधवः शं भजन्ताम् ॥
त्रिचत्वारिंशता पद्यैर्मुहूर्तपदवीमिमाम् ।
पाञ्चलग्रामवास्तव्यो द्विजः कश्चिदरीरचत् ॥

Colophon

मुहूर्तपदवी समाप्ता ।

शुभमस्तु ।

Author ·

Remarks—The identity of the author is not clear from the text It is known from the colophon that he belonged to Pañcālagrāma. The work is printed with a Malayālam commentary as No 5. in SVSLS. Much difference is discernible between the two in that the latter attributes the authorship to one Māttūr Nambūri. Moreover, only 36 ślokas go to form the printed edition while the author himself states that the work contains 43 verses The invocatory verse and some verses in the middle differ from those in the printed work.

---

## ॥ मुहूर्तपदवी ॥

### 914 MUHŪRTAPADAVĪ.

Substance—Palm leaf. Size—$6\frac{7}{8}'' \times 1\frac{1}{8}''$. Leaves—12. 7 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—100.

Subject—Same as No. 911.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
प्रत्यू(ह्प्रतिह)न्तारं नमस्कृत्य गणाधिपम् ।
मुहूर्तावग(मे मार्ग)मृजुं कर्तुं यतामहे ॥
(उल्कोर्वी)चलनोपरागगुलिकाः षष्ठा(ष्टमान्त्ये)न्दुस-
दृष्टारूढविमुक्तराशि(सितदृक्सा)याह्नसन्ध्यादयः ।
गण्डान्तोष्णवि(षं स्थिरं च क)रणं रिक्ताष्टमीविष्टयो
लाटैकार्गलवैधृताहिशिरमः सर्वत्र वर्ज्या अमी ॥

End

कन्दे मन्ददिनं सितारदिनकृद्वारांस्तिले वर्जयेद्
भौमस्याळुपसूरणेऽर्कदिवसो मुद्रेऽपि निन्द्योऽसृजः ।
मध्यं मूलकुलत्थयोर्गुरुदिनं नेष्टं तिले मच्छनेः
पूगादौ तु न वेधकर्क्यजतुलाभृङ्गाः सदृग्भ्रानिनम् ॥
कुम्भपूर्तितिथिभाम्बुचन्द्रमो-
वृद्धिरिःफरिपुचन्द्रमन्ददृक् ।
धान्यवृद्धिशुभदं न कृत्तिका-
शक्रनक्रवणिगाद्यराशयः ॥

Colophon

इति मुहूर्तपदव्यां तृतीयपरिच्छेदः ।

Author—Remarks—Same as No. 913.



॥ मुहूर्तपदवी ॥

## 915. MUHŪRTAPADAVĪ.

Substance—Palm leaf. Size—$4\frac{1}{2}'' \times 1\frac{3}{8}''$ Leaves—11 7 lines per page and 38 letters per line. Script—Malayālam No. of Granthas—100. Complete.

Subject—Same as No 911.

Beginning etc.—Same as No. 913.

---

॥ मुहूर्तपदवी ॥

## 916 MUHŪRTAPADAVĪ.

Substance—Palm leaf Size—$6'' \times 1\frac{3}{4}''$ Leaves—6 10—12 lines per page and 20 letters per line Script—Malayālam. No. of Granthas—100. Complete.

Subject—Same as No 911.

Beginning etc.—Same as No 913.

---

॥ मुहूर्तपदवी ॥

## 917 MUHŪRTAPADAVĪ.

Substance—Palm leaf Size—$5\frac{1}{2}'' \times 2''$ Leaves—6. 10—12 lines per page and 24 letters per line. Script—Malayālam. No of Granthas—100. Complete,

Subject—Same as No. 911.

Beginning etc —Same as No. 913.

Remarks—The following two verses occur just after the colophon :

गोपनीयमेतत्—

कन्यकाजन्मलग्ने वा द्वादशाष्टमषष्ठभे ।
चतुर्थे दशमे जाते जन्मभ्रातृगतोऽशुभः ॥
अन्यत्र शुभदो जीवो गौरी वयसि सप्तसु ।
सर्वत्रापि शुभ दद्याद् द्वादशाब्दात् परं गुरुः ॥

---

## ॥ मुहूर्तपदवी ॥

## 918. MUHŪRTAPADAVĪ.

Substance—Palm leaf Size—10″ × 1″ Leaves—8. 6 lines per page and 76 letters per line Script—Malayālam. No. of Granthas—100. Complete.

Subject—Same as No. 911

Beginning etc.—Same as No. 913.

Remarks—The Ms. is much damaged.

---

## ॥ मुहूर्तपदवी ॥

## 919. MUHŪRTAPADAVĪ.

Substance—Palm leaf. Size—14″ × 2″. Leaves—3.

9—11 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—100. Complete.

Subject—Same as No 911.

Beginning etc —Same as No 913.

Remarks—The following verses occur after the colophon

मूर्तिं करोति दिनकृद् बुधवा कुजश्च (?)
राहोर्विनष्टतनयो रविजाद् दरिद्रः ।
शुक्रः शशाङ्कतनयश्च गुरुश्च साध्वीं
ह्यायुःक्षयं च कुरुते नयनाभिरामः ॥
कुर्वन्ति भास्करशनैश्चरराहुभौमा
दारिद्र्यदुःखमतुल च तथा द्वितीये ।
वित्तेश्वरीयसहिता गुरुशुक्रसौम्या
नारीं प्रभूततनयां कुरुते शशाङ्के ॥
सूर्येन्दुभौमगुरुशुक्रबुधास्तृतीये
कुर्युः सदा बहुमहाधनभाजिनीं च ।
व्ययित्य? दिवाकरसुतः कुलटां करोति
मृत्युं ददाति नियतं खलु सैंहिकेयः ॥
तस्मिन् फलं भवति सूर्यसुतश्चतुर्थे
संभोग्यमुष्णकिरणः कुरुते शशाङ्के ।
राहुस्तु भावरहितां क्षितिजोऽपवित्तां
दैन्य भृगुः सुरगुरुश्च बुधश्च सौख्यम् ॥
नष्टात्मजामपि कुजे खलु पञ्चमस्थे
चन्द्रात्मजो बहुमतिं गुरुभार्गवौ च ।

राहुर्ददाति मरणं शनिरामयत्वं
कन्याप्रधानमधिकं कुरुते शशाङ्के ॥
षष्ठे दिवाकरशनैश्चरराहुभौमाः
.....गुरुश्च सुभगां धनभोगिनीं च ।
चन्द्रः करोति विधवामुशना दरिद्रां
मृत्युं शशाङ्कतनयः कलहं प्रियश्च ॥
सौरारजीवबुधराहुरविश्च शुक्रा-
दन्नं प्रदाय खलु सप्तमराशिमस्थः ।
वैधव्यबन्धनधनक्षयशत्रुनाशं
व्याधिप्रवासमरणानि यथाक्रमेण ॥
स्थानाष्टमे गुरुबुधौ नयतो वियोगं
मृत्युं शशी भृगुसुतश्च तथैव राहुः ।
सूर्यः करोति विधवां मरणं महीजः
सूर्यात्मजो धनपतिः पतिवश्यभाजम् ॥
धर्मे स्थिता भृगुदिवाकरभूमिपुत्रै-
र्जीवश्च धर्मनिरतिं शशिजश्च रोगम् ।
राहुश्च सूर्यतनयश्च तथैव वश्यां
कन्याप्रसूतिमथवा कुरुते शशाङ्के ॥
राहुर्नभस्तलगतो विधवां करोति
पापैस्तथा दिनकरश्च शनिश्च मृत्युम् ।
अन्त्ये गुरुर्धनपतिस्त्वरितं दरिद्रं
चन्द्रो धनव्ययकरः कुलटां च राहुः ॥
साध्वीं भृगुः शशिसुतो बहुपुत्रपौत्रान्
प्राणप्रशस्तहृदयो रविजः कुजश्च ॥
इति विवाहपटलं समाप्तम् ।

## ॥ मुहूर्तपदवी ॥

### 920 MUHŪRTAPADAVĪ

Substance—Palm leaf Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—6
6 lines per page and 32 letters per line Script
—Malayalam No of Granthas—70 Incomplete

Subject—Same as No. 911.

Beginning—Same as No 913.

End

चित्राद्वयाश्विविधित्रिवारुणगुरुश्रीशाः कुजार्कार्यविद्
वाराम्बुक्षयदुष्टयोगचरवर्णान्त्यालिरिक्ताः शुभाः ।
नो पूर्णा निधनारिगा अपि खगा जन्मत्रयश्चोपचे
नेत्रेऽन्त्योग्रदिनान्धभानि शुभदाः क्षौरे चराधोमुखाः ॥

... . ... .... .... ....

Colophon

Author

Remarks—The Ms. comes to a close with the 30th verse.

---

## ॥ मुहूर्तपदवी ॥

### 921 MUHŪRTAPADAVĪ

Substance—Palm leaf. Size—$11'' \times 1\frac{1}{2}''$. Leaves—4. 8 lines per page and 40 letters per line.

Script—Malayālam. No of Granthas—100 Complete

Subject—Same as No 911.

Beginning etc —Same as No 913.

Remarks—The following verse precedes the colophon.

"यजुर्विदां व्रते शस्ता देवाख्या एव तारकाः ।
कृत्तिकादिविशाखान्ता देवसंज्ञाश्चतुर्दश ॥

---

## ॥ मुहूर्तपदवी ॥

### 922 A MUHŪRTAPADAVĪ.

Substance—Palm leaf. Size—18″ × 1½″. Leaves—3 8 lines per page and 64 letters per line Script—Malayālam. No. of Granthas—100. Complete

Subject—Same as No. 911.

Beginning etc —Same as No. 913.

---

## ॥ सारावलिः ॥

### 922 B. SĀRĀVALI.

Substance—Palm leaf. Size—18″ × 1½″. Leaves—5. 8 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—160.

Subject—Description of the influences of the twelve signs of the zodiac.

Beginning :

मूर्त्यादयः पदार्था जायन्ते येन विविधजन्तूनाम् ।
तस्मादधुना वक्ष्ये भावाध्यायं विशेषेण ॥

लग्नेऽर्केऽल्पकचः क्रियालसतमः क्रोधी प्रचण्डोन्नतो
मानी लोचनरूक्षकर्कशतनुः शूरोऽक्षमो निर्घृणः ।
स्फोटाक्षः शशिभे क्रिये सतिमिरः सिंहे निशान्धः पुमान्
दारिद्र्योपहतो विनष्टतनयो जातस्तुलायां भवेत् ॥

End :

सराण(?)द्रव्यहीनार्त्तश्चपलो(?)पतितोऽधनः ।
विदेशनिरतः कामी केतौ द्वादशसंस्थिते ॥

Colophon

केतुभावफलम् ।

Author—Kalyāṇavarmā.

Remarks—The Ms. is styled Horā in the revised Catalogue, MPL. But it is only the 30th chapter of *Sārāvalī* by Kalyāṇavarmā. Moreover the influences of Rāhu and Ketu are included herein. The following stanza occurs in the wake of the colophon :

चक्षुरीशो धरापुत्रः प्राणशश्चन्द्रनन्दनः ।
जीवेशौ चन्द्रशुक्रौ तु श्रवणेशो बृहस्पतिः ॥

## ॥ मुहूर्तपदवी ॥

## 923 A MUHŪRTAPADAVĪ.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{7}{8}''$. Leaves—3. 9 lines per page and 56 letters per line Script—Malayālam No of Granthas—100. Complete.

Subject—Same as No. 911

Beginning etc.—Same as No. 913.

---

## ॥ पञ्चबोधः ॥

## 923 B PAÑCABODHA

Substance—Palm leaf Size—$14\frac{1}{2}'' \times 1\frac{7}{8}''$ Leaves—3. 9 lines per page and 48 letters per line. Script— Malayālam. No. of Granthas—70. Complete.

Subject—Same as No 890 A.

Beginning:

सर्वेषां ज्योतिषामाद्यं नमस्कृत्य दिवाकरम् ।
लघूकृत्य विधास्यामि व्यतीपातादिबोधनम् ॥
आर्द्रानक्षत्रमादित्याद्यावत्तावति भे ततः ।
लाटश्चतुर्दशे तस्माद्वैधृतस्तत्परेऽपि वा ॥
चलतत्त्वौ जलर्क्षादिभगणाद्यान्तिमार्धयोः ।
राहुभस्याभिमुख्येन तच्चतुर्दशभस्य च ॥

अथ स्फुटग्रहाः कार्याः सकला इह सायनाः ।
क्रान्तिलिप्तास्तु चन्द्रादेः स्वस्वविक्षेपसंस्कृताः ॥

End :

ग्रहेऽर्कादधिके व्यस्तं संस्कार्यमुभयोश्चरम् ।
तयोरन्तरभागैः स्याद् ग्रहमौढ्यावबोधनम् ॥
इति पञ्चाशता श्लोकैः पंञ्चानां बोधनं लघु ।
विहितं गणकानां तत् करणं व्यावहारिकम् ॥

Colophon ·

पञ्चबोधः समाप्तः । शुभमस्तु । हरिः ।

Author ·

Remarks—Only the text is extant in this Ms. It is available in print.

---

## ॥ आचारसंग्रहः ॥

### 923 C ĀCĀRASAṄGRAHA.

Substance—Palm leaf Size—$14\frac{1}{2}'' \times 1\frac{7}{8}''$. Leaves—10. 9 lines per page and 48 letters per line. Script—Malayālam. No. of Granthas—270. Complete.

Subject—Same as No. 865

Beginning etc —Same as No. 867.

Remarks—The closing Fol. contains the following

ślokas in *Maṇipravāla* on the author's attempt towards the exposition of the *ācāras*.

“മ്ലേഛാ മുററും മുതൽമുടിവരിഞ്ഞാനിയെ കണ്ടുകേട്ടു
ള്ളാചാരംകൊണ്ടപി ച മുനിഭിഃ പ്രോക്തമാലോക്യ കിഞ്ചിൽ
ഭാഷാമിശ്രംപൊഴ്ത്തു കഥയാമ്യദ്യനാഠം പത്തുമാത്രം
വല്ലുംലോകേഹിതമിതി തതഃ ക്ഷന്തുമർഹന്തിസന്തഃ
പൊഴ്ത്തുന്നുള്ളരാപൊളൊൻ എഴ്ത്തുന്നെന്നിതാഭരാൽ
ത്തുയൊരുവിപ്രവശ്യായ ചെമ്പൂർ നാരായണായ ഞാൻ.
ഇരുപത്തേഴ്നാളുമാല്യം മേടമശ്വതിയുംമുതൽ
ഒമ്പതൊമ്പതുനാഠം കാലാൽവരും ദ്വാദശരാശയഃ
ചൊവ്വാ വെള്ളി ബുധൊfഥതിങ്കഠംവക”.

---

## ॥ मुहूर्तपदवी (केरलभाषाव्याख्योपेता) ॥

### 924 MUHŪRTAPADAVĪ
with Malayālam commentary.

Substance—Palm leaf. Size—$9'' \times 1\frac{5}{8}''$. Leaves—35. 8—12 lines per page and 32—40 letters per line Script—Malayālam. No. of Granthas—750 Complete

Subject—Same as No. 911.

Beginning

श्रीः । हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।
अभिवाद्य गणाध्यक्षं वाग्देवीञ्च गुरून् ग्रहान् ।
मुहूर्तपदवीमेप भाषया व्याकरोम्यहम् ॥

ഇതി മുഹൂൎത്തപദവിയാം ഗ്രന്ഥത്തെ ചമപ്പാൻ തുടങ്ങുന്ന ആചാൎയ്യൻ അതിന്റെ അവിഘ്നപരിസമാപ്ത്യാദിപ്രച (ണ്ഡ?യ) ഗമനപ്രയോജന സിദ്ധ്യൎത്ഥമായിട്ടു ഇഷ്ടദേവതാ നമസ്കാരത്തെ മുന്നിട്ടു ചികീൎഷിതം പ്രതിജ്ഞചെയ്യുന്നു.

प्रत्यूहप्रतिहन्तारं प्रणिपत्य गणाधिपम् ।
मुहूर्तावगमे मार्गमृजुं कर्तुं यतामहे ॥

ഇനി എല്ലാ കൎമ്മങ്ങൾക്കും നടേ വൎജ്ജിക്കേണ്ടും ദോഷഗണനം ചൊല്ലുന്നിതു

End

कुम्भपूर्तितिथिभाम्बुचन्द्रमो-
वृद्धिरिःफरिपुचन्द्रमन्ददृक् ।
धान्यवृद्धिशुभदं न कृत्तिका-
शक्रनक्रवणिगाद्यराशयः ॥ इति ।

നാലേഴു കാൎത്തിക തുടങ്ങിയവററിൽ മധ്യ
ത്തുണ്ണാലു കീഴ്പരിചാഷ്ടാഘടത്രികാഃ സ്യുഃ
മേൽ നില്ക്കിലക്ഷ്നിഹ കുമ്പിട്ടമന്യഥാന്യേ
സ്തംഭേഷു ചേന്നിറകുടം നെലയാവതെല്ലാം
ഇതുകൊണ്ടു കുംഭപൂൎത്തി അറിഞ്ഞുകൊൾക.

നിറപ്പാൻ കുംഭപൂൎത്തി വേണം. തിഥിഭാംബുചന്ദ്രമാവൃദ്ധി എന്ന പക്കവും നാളും ഏറുക. വേലിയേററം പൂൎവ്വപക്ഷമായിരിക്ക നിറകുടം ഉണ്ടാകയും ചെയ്യുമ്പോൾ പഞ്ചപൂൎത്തി ആകുന്നതു. നെറപ്പാൻ പഞ്ചപൂൎത്തി വേണം. രിഃഫരിപുചന്ദ്രഃ എന്ന പന്ത്രണ്ടാമേടത്തും ആറാമേടത്തും ചന്ദ്രനെക്കൊള്ളാം. മന്ദദൃക് എന്ന ശനിദൃഷ്ടി പെരികേനന്നു. ധനധാന്യവൃദ്ധി ശുഭദം എന്ന നിറപ്പാൻ ഇവനന്നു. നകൃത്തികാശക്ര എന്ന കാൎത്തികയും തൃക്കേട്ടയും കൊള്ളരുതു്. നക്രവണിഗാദ്യരാശയഃ

ഏന്ന—നക്രം മകരം വണിക് തുലാം ആദ്യം മേടം ഈ രാശി കളും കൊള്ളരുത് അപരപക്ഷത്തിൽ ത്രയോദശി നിറപ്പാൻ കൊള്ളുന്ന നവദോഷങ്ങളെ വർജ്ജിക്കണം. അതിൽ ഗുളി കോദയം കൊള്ളുന്ന പഞ്ചമി ദശമി വാവ് ഇവ പെറികെ നന്നു്- ഇവ കൂട്ടകിലെ പഞ്ചപൂർത്തി ഉള്ളൂ

Colophon

मुहूर्तपदव्यां व्याख्यानं समाप्तम् ।

Author

Remarks—The work is printed as No. 5 in SVS LS. and the variants in reading are noteworthy.

---

## ॥ मुहूर्तपदवी (केरलभाषाव्याख्योपेता) ॥

### 925. MUHŪRTAPADAVĪ

with Malāyalam commentary.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—50. 8 lines per page and 28 letters per line. Script—Malayālam. No. of Granthas—700. Incomplete.

Subject—Same as No 911.

Author .

Remarks—The commentary extends up to a fragment of the 21st verse A few leaves at the close are blank.

---

## ॥ मुहूर्तपदवी (केरलभाषाव्याख्योपेता) ॥

### 926 MUHŪRTAPADAVĪ
### with Malayālam commentary

Substance—Palm leaf Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$ Leaves—35 10—11 lines per page and 50 letters per line. Script—Malayālam No of Granthas—700.

Subject—Same as No 911.

Author .

Remarks—The last two leaves describe the auspicious time for the manufacture of weapons, their use etc. After the colophon the scribe's name is seen as follows

"शङ्करहस्तेन लिखितमिदम्"

## ॥ मुहूर्तरत्नम् ॥

### 927 A. MUHŪRTARATNAM.

Substance—Palm leaf Size—$14'' \times 2''$. Leaves—5 9 lines per page and 56 letters per line Script—Malayālam No. of Granthas—170. Incomplete

Subject—Same as No 911.

Beginning:

... ... ... स्यात् ।

झषनारीमिथुनगता . . . . . केशशिमन्त्रिणः क्रमेणेत्वम् ॥

इति जलयोगा गदितास्तन्त्रेणोक्तौ तु कूपयोगाद्यौ ।
वृषभगते चन्द्रमासि राहुर्जामित्रगो जलं नैव ॥
प्रष्टुः क्षेत्रे प्रश्नादित्थं मामान्यतो जले ज्ञाते ।
देशविशेष ब्रूयाद्दिवज्ञश्चन्द्रगुप्तिचक्रेण ॥

End

जिह्वोष्टदन्तमूलानां रक्तिमोत्तमसम्पदे ।
एतेषां नीलिमा भूयो विपरीतफलप्रदा ॥

Colophon

रविचन्द्रादितिमिङ्गिललोल-
ज्योतिषदुग्धमहाम्बुधिमध्यात् ।
गोविन्देन मुहूर्तमहामणि-
रुद्धृत एष तु लोकहिताय ॥
इति मुहूर्तरत्ने चतुर्थोऽध्यायः ।

Author—Govinda

Remarks—The Ms begins abruptly in the middle of the 4th chapter. The missing 3 chapters have been transcribed from another Ms. and preserved in the Curator's Office Library, Trivandrum. They deal with the 16 purificatory rites, Muhūrtas etc. A complete Ms of the work has been noticed in TCM. Madras, under R. No 3295.

---

## ॥ वास्तुलक्षणम् ॥

### 927 B. VĀSTULAKṢAṆAM

Substance—Palm leaf. Size—14″ × 2″. Leaves—7

10 9 lines per page and 58 letters per line Script—Malayālam. No. of Granthas—350.

Subject—The rules for the construction of buildings.

Beginning.

गणपतये नमः ।

पादो न त्रिकरादिपञ्चदशहस्तांशाङ्गुलान्तोत्तर-
ष्वष्टाष्टाङ्गुलवृद्धितोऽन्तरभवद्योनिप्रभेदेष्वथ ।
प्रत्यक्प्रागुदनक्रमेण विहितेष्वल्पेषु वा . . .
प्रासादेषु विशिष्टजातिषु निजेष्टं कारयेत् कारुभिः ॥

End.

पीठोंघे नृपभाजिते क्षितिशराब्धि त्र्यंशकं पादुकं
प्राद्ध्याज्जगतीं तथा कु(मु)दकं तत्पाङ्क्तिकां च क्रमात् ।
अङ्गाभ्यां गळमंशकेन गळपङ्क्तिं जागतेऽध्यशिनि
ग्रीवान्तेऽर्धयुतद्वयेन वळभिं शिष्टेन वक्त्रं सदा ॥

Colophon

Author :

Remarks—The Ms furnishes all details regarding architecture.

---

## ॥ विश्वकर्मीयम् (केरलभाषामणिप्रवालम् ) ॥

### 927 C. VIŚVAKARMĪYAM.

Substance—Palm leaf. Size—14″×2″. Leaves—5. 9 lines per page and 56 letters per line. Script—Malayālam. No. of Granthas—150.

Subject—Same as No. 927 B.

Beginning :

വിശ്വേ(ശ്വര)നെ വന്ദിച്ചു വിശ്വകർമ്മീയലക്ഷണം
മണിപ്രവാളമാക്കിന്റേൻ പടിപ്പാന്മന്ദചേതസാം.
കിഴക്കമുതലായ്‌ നാലുദിക്കിൽ നീള്ളുററുകുന്നിവ
ഗോവീഥീയമവീഥീച വാരുണീ ഗജവീഥിയും
ആഗ്നേയം മുതലായുള്ളകോണിൽ നീരൊഴുകിന്നവ
വൈശ്വാനരീരാക്ഷസീയം നാഗീയം ധാന്യവീഥിയും
ഇന്ദ്രാഗ്ന്യഭ്യന്തരം മുമ്പായന്തരാളങ്ങളെട്ടുള്ളു
പൈതാമഹാഖ്യമപഥം ശ്മശാനം രോഗവർദ്ധനം
ആസുരംസുപഥം പുണ്യം ദീർഘമായുർ(ഷ്ഠാമങ്ഗ്ള?-
മങ്ഗളങ്ങളാം)

End :

കർമ്മിണാം ദക്ഷിണാം ദത്വാ ഗൃഹംകൊണ്ടു ഗൃഹേശ്വരൻ
പുണ്യാഹം വാചയിത്വാ താൻ വാസ്തുപൂജാം ച കാരയേൽ.
തേഷാമനുഗ്രഹംകൊണ്ടു കുടിപൂക ഗൃഹങ്ങളിൽ
ലക്ഷണം വിസ്തരിച്ചാലോ പുസ്തകം വലുതാമിതു.

Colophon

വിശ്വകർമ്മീയമെമ്മോളം ചൊന്നാൻ സംക്ഷേപഭൂഷണം
വാസുദേവൻ ചമച്ചോരു വാസ്തുലക്ഷണപുസ്തകം
വാ(സി?യി)ച്ചവർക്കും വായിപ്പാൻ വായിക്കാം നാലുവർണ്ണവും
മരയാളത്തു യച്ഛാസ്ത്രം ചൊല്ലിത്തന്നൊരുലക്ഷണം
സൂത്രിച്ചേനറിയുമ്മണ്ണം തസ്മൈ നിത്യം നമോ നമഃ

Author—Vāsudeva.

Remarks—Same as No 927 B. The work is written in Maṇipravāla style

## ॥ मुहूर्तरत्नम् ॥

## 928. MUHŪRTARATNAM.

Substance—Palm leaf. Size—22″ × 2″. Leaves—68 8 lines per page and 50 letters per line. Script—Malayālam. No. of Granthas—1700 Incomplete.

Subject—Same as No. 911

Beginning:

यद्गत्या सकलं शुभाशुभमिहामुत्रापि संलक्ष्यते
यच्चारः समभिव्यनक्ति सकलं भूतं तथानागतम् ।
येषां चारत एव जन्ममरणे संपद्विपत्प्राणिनां
तानेतान् शिरसा नमामि सततं सूर्यादिसप्तग्रहान् ॥

End:

मत्स्याङ्कुशाब्जयववज्रहलादिचिह्ना-
वस्वेदनौ मृदुतलौ चरणौ प्रशस्तौ ।
जङ्घे च रोमरहिते विसिरे निवृत्ते
जानुद्वयं सममनुल्बणसन्धिदेशे ॥

Colophon:

इति मुहूर्तरत्ने चतुर्थोऽध्यायः ।
मुहूर्तरत्नं समाप्तम् ।

Author—Same as No 927 A

Remarks—68 leaves, out of 109, constitute this codex. The front leaf is numbered "26". It begins with a fragment of the 1st chapter

and ends on the 4th. The leaves 31—46 are missing. The two verses quoted below are seen just after the colophon:

नक्षत्रातिथिराशीनां व्यत्यासे विहितोत्तरे ।
काले चावर्तनं कुर्याद्राशेः कैश्चिद्धि कथ्यते ॥
सार्यं भौमो बुधो लोके धनी शुक्रः पट्टुगुरोः ।
माया सौरिप्रियश्चन्द्र इत्येते मूढलक्षणम् ॥

---

## ॥ मुहूर्तरत्नम् ॥

### 929. MUHŪRTARATNAM.

Substance—Palm leaf. Size—$6\frac{2}{3}'' \times 1\frac{1}{2}''$ Leaves—160 8 lines per page and 20 letters per line Script—Malayālam. No of Granthas—1600. Incomplete

Subject—Same as No. 911

Beginning

....रोपि दूरे तद्.......शुभक्रियालाट..........ग्रहसन्ध्य......
ण्णिका नाडी विप.........न भिद्यन्ते .....दर्कं चन्द्रार्क....

End.

.......राजगृह च.... करे भवेत् । क्षितिपैश्च पू....

Colophon

(मु)हूर्तरत्नमालेयं ग्रथिताभेकवल्लभा ।
पादपीठेऽर्पिते......यतामनया शिवः ॥

इति मुहूर्तरत्ने वर्ष... ... ... ... ...

श्चतुर्थोऽध्यायः । मुहूर्तरत्नं समाप्तम् ।

इदं मुहूर्तरत्नाख्यं ज्योतिष्प्रकरणं मया ।

निबद्धं त्र्यब्दग्रवासी वा पुत्रो वाधिकृतोऽत्र हि ॥

Author—Same as No 927 A.

Remarks—The leaves are much decayed

---

## ॥ मुहुर्तरत्नव्याख्या ॥

## 930 MUHŪRTARATNAVYĀKHYĀ.

Substance—Palm leaf. Size—14½″ × 2″ Leaves—60 9 lines per page and 64 letters per line. Script—Malayālam. No of Granthas—2200.

Subject—Same as No 911.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

अरुणस्तु . . . सं. . . . . . ।

. . . . . ज्ञाननिधिं वन्दे कृपालय. . . . ॥

मुहूर्तागमदुग्धाब्धेर्मुहूर्तमणिरुद्धृतः ।

तस्मिंस्तच्छिष्यशिष्येण शिष्याणां मन्दचेतसाम् ॥

क्रिया . . . . . . प्रबोधाय यथाश्रुति ।

यत्स्वातन्त्र्येण . . . . . . . . . . . . . ॥

लस्येतिशेति . . . .येण प्रत्यक्षीकृतत्वात् . . . . . . . . . . . . . .
श्रेयसां . . . करोमीति . . . कल . . .त्मकस्येश्वरस्य स्तवनमा-
मर्थ्यात् ग्रहाश्रितं ज्योतिःशास्त्रमभिधीयत इति प्रदर्शितम् ।

End

राहुगते भृगुतनये मिथुनगतश्चेच्छशी जलं भूरि ।
स्वोच्चगतौ भृग्विन्दू नीचगतैः प्रेक्षितौ पृथक् जलौ ? ॥
उदयति वृषभगतेन्दौ यद्यारूढः स्थिरोऽम्बुकूपोऽपि ।
स्थिरराशौ लग्नगते यदि सितकृष्णौ सहस्थितौ तद्वत् ॥
सिंहगते शशिनि यदि प्रष्टा जलराशिगोऽम्बुमन्दम् (?) ।

Colophon

इति मुहूर्तरत्ने ग्रहशान्तिपर्यन्तविधायको द्वितीयोऽध्यायः।

Author

Remarks—The Ms. breaks off in the 3rd chapter. At the outset it is noted that the author of *Muhūrtaratna* was the commentator's प्राचार्य The leaves are much damaged

---

## ॥ मुहूर्तविधानम् ॥

### 931. MUHŪRTAVIDHĀNAM.

Substance—Palm leaf. Size—15″×1½″. Leaves—121. 10 lines per page and 52 letters per line Script—Malayālam. No. of Granthas—4000 Complete

Subject—Same as No. 865.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।
अनन्तकान्तिप्रभव विनायकं
सनन्दनाद्यैर्मुनिवृन्दवन्दितम् ।

भुजङ्गपाशाङ्कुशदण्डधारिणं
नमामि नित्यं नरदेवपूजितम् ॥
श्रीसरस्वत्यै नमः ।
त्रैलोक्यस्य विधातारं प्रणम्य चतुराननम् ।
पितामहेरित शास्त्रमिन्द्रायाह बृहस्पतिः ॥
समूचुर्यवनाः शास्त्रं य(था?दा)हेन्द्राय तद्गुरुः ।
पृष्टो वै देवनिर्दोषगुणजिज्ञासतां बुधः ॥
बृहस्पतिमुवाचेन्द्रो जिज्ञासुः शुभकर्मणाम् ।
शुभकालः कथं ग्राह्यो निर्दोषः कथ्यतामिति ॥

End ·

तस्मिन् पितृभ्यो यद्दत्तं तदक्षयफलावहम् ।
देशान्तरमृतानां च राजभिर्वा विषादिभिः ॥
तेषां रूपं पलाशाङ्गैः कृत्वा काले पुनर्दहेत् ।
एषु योगेषु दाहादिश्राद्धं तच्च समारभेत् ॥

Colophon ·

इति बार्हस्पत्ये मुहूर्तविधाने श्राद्धकालविधानो नाम एकोनत्रिंशोऽध्यायः । बार्हस्पत्यं समाप्तम् ।

शुभमस्तु ।

Author—Bṛhaspati.

Remarks—At the close of the Ms. occur the following verses bearing upon *Śivarātri* etc.

" आदित्यमुत्थित.... ....गम्यतारा-
स्तिस्रो मृताः सप्त ततोऽर्धजीवाः ।
एकामृता अष्टसु पूर्णजीवा
काचिन्मृता सप्तसु पादजीवा ॥

भानुभात् शुचिसादुग्धं नारी यत्र गुरुर्गुरुः ।
वीरं शुभं तच्छत्रादौ परतारा हि वर्जिताः ॥
अर्धरात्रादधश्चोर्ध्वं व्याप्ता यत्र चतुर्दशी ।
तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः ॥
रात्र्यां त्रिभागभक्तायां मध्यभागे चतुर्दशी ।
शिवरात्रिव्रतं तस्यां कुर्यादित्यपरे विदुः ॥
कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धा तु कर्तव्या परविद्धा न कस्यचित् ॥
मुख्या त्रयोदशीयुक्ता पर्वयुक्ताधमा स्मृता ।
मध्यमा शिवरात्रिः स्यादहोरात्रे चतुर्दशी ॥
तिथिनक्षत्रयोर्योगे तिथिरेव बलीयसी ।
तिथ्यन्ते पारणं कुर्याद्विना कृष्णचतुर्दशीम् ॥"

The work is also known as *Bārhaspatya.*

---

## ॥ मुहूर्तविधिः ॥

## 932 MUHŪRTAVIDHI.

Substance—Palm leaf. Size—$15\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—5 10 lines per page and 48 letters per line. Script — Malayālam No of Granthas—150. Incomplete.

Subject—Same as No 865.

Beginning.

गणपतये नमः । श्रीसूर्यादिसर्वग्रहेभ्यो नमः ।

जयत्युच्चण्डगोषण्डखण्डिताखण्डलासुहृत् ।
ब्रह्माण्डमण्डलीभूतमण्डलोऽखण्डमण्डलः ॥
बृहस्पत्यादिभिः प्रोक्तं ज्योतिःशास्त्रात् समुद्धृतम् ।
मुहूर्तं कथ्यतेऽस्माभिर्दैवज्ञहितकाम्यया ॥
राशयस्तिथयस्तारा मुहूर्तमिति कथ्यते ।
यदन्यदाह तत् सर्वं सर्वदोषगुणान्तरम् ॥
तयोरन्यं बलिं हन्ति तुल्यौ चेन्निष्फलावुभौ ।
बलवानपि दोषौघः स्वापवादैर्विनश्यति ॥

End

नवमे सप्तमे वा प्राक् पञ्चमे मङ्गलाङ्कुरम् ।
निशारम्भेऽह्नि वा कुर्यात् काले र . .निते शुभे ॥
मङ्गलाङ्कुरविधिः ।
तिष्योत्तराश्विश्रवणाजहस्ताः
पौष्णानुराधामरुतोऽश्विनी च ।
क्रमात् प्रति . . . . . . . .
. . . . . . . . . . . . . . ॥

Colophon.

यात्राविधिः ।

Author.

Remarks—The work ends with the *Yātrāvidhi prakarana.*



## ॥ रणदीपिका ॥

## 933. RANADĪPIKĀ.

Substance—Palm leaf. Size—16½" × 2". Leaves—8. 10—11 lines per page and 56 letters per line Script— Malayālam No of Granthas—280. Complete

Subject—Determination of *Muhūrtas* for martial march.

Author—Kumāraganaka.

Remarks—The work is printed in TSS as No 95. The following stanzas occur at the close.

“കപ്പലാകൃതിരേഖൊസു രവ്യാത്തുഢക്ഷമെണ്ണുക
പുറത്തുനാലും കണ്ണില്ല അതുകൊണ്ടാകിലനർത്ഥമാം
പിന്നെപ്പലകമേതന്നാറിതേകണ്ടതിശോഭനം
കൊള്ളല്ലാ ബുദ്ധിമാൻ ശൂലംപുറത്തൊമ്പതുനാളത
പിന്നെപലകതന്നാറും കൊള്ളാന്തോണിയിറക്കുവാൻ
പിന്നേതുമൂന്നുംപുറമെ കൊള്ളല്ലാ അന്ധമാകയാൽ

भानुभात्शुचिसादुग्ध नारी यत्र गुरुर्गुरुः ।
वीरं शुभं तच्छत्रादौ परतारा हि वर्जिताः ॥
सार्केक्षं वाश्ववत्तच्छिन्नमुखनवकं साभिजिद्गण्यमानं
प्रोद्वाहानिष्टमासाविमृगखरगृहा जन्मभान्यन्धभं च ।

ആദിത്യൻ നിന്നനാളന്ധം ക്രമാമുമ്മൂന്നനാൾ പുനഃ

अन्धकाणाक्षिदृक्काणदृग्दृक्काणान्धसंज्ञिताः ॥

കഷ്ടിച്ചു കാണഭം കൊള്ളാം അന്ധഭാനി വിവർജ്ജയേൽ,

॥ रणदीपिका ॥

934. RAṆADĪPIKĀ.

Substance—Palm leaf. Size—$8\frac{1}{2}'' \times 1\frac{5}{8}''$. Leaves—14. 9—11 lines per page and 50 letters per line. Script—Malayālam. No. of Granthas—280. Complete.

Subject etc.—Same as No. 933

---

॥ रणदीपिका ॥

935. RANADĪPIKĀ,

Substance—Palm leaf Size—$7'' \times 1\frac{3}{8}''$. Leaves—29. 7—8 lines per page and 20 letters per line. Script—Malayālam. No of Granthas—280 Complete

Subject etc.—Same as No. 933

Remarks—The last 10 leaves are blank.

---

॥ रूपप्रश्नः ॥

936 RŪPAPRAŚNA

Substance—Palm leaf. Size—$5'' \times 2''$. Leaves—69. 4 lines per page and 8 letters per line. Script—Malayālam. No of Granthas—72.

Subject—Astrological disquisition on *Praśna-bhāga.*

Beginning ·

अविघ्न सर्वकार्येषु साफल्यं दिव्यरूपता ।
सम्पत्तिरर्थलाभश्च गणनाथेन दृश्यते ॥

शुभम् ।

सन्तापं सुखनाशं च सर्वत्राशुभमेव च ।
ज्वरादिकं च रोग च मांसिनीवात्र दृश्यते ॥ फलम् ॥
दिव्यरत्नगृहावासो वनिताजनसङ्गमः ।
कान्तिमत्ता प्रभुत्वं च मण्ड(पे ? ले) नैव दृश्यते ॥

End:

त्रैलोक्यविजयश्रीत्व सर्वकार्येषु शोभनम् ।
नित्य राजप्रसादश्च ध्वजरूपेण दृश्यते ॥

शुभम् ।

Colophon ·

Author ·

Remarks—72 pictures are given in the course of the work along with an equal number of verses in *Anuṣṭup* metre explaining them. These pictures facilitate prognostication by the astrologer. (Vide p 534, CC. Vol. I)

---

## ॥ रूपप्रश्नः ॥

## 937 RŪPAPRAŚNA.

Substance—Palm leaf. Size—5″ × 2″. Leaves—72.

4 lines per page and 8 letters per line. Script —Malayālam. No. of Granthas—72.


Subject—Beginning—Same as No. 936.

End ·

सर्वलोकेषु सम्मानं सर्वत्र विजयस्तथा ।
स्त्रीसौख्यं पुत्रसौख्यं च श्रीकृष्णेनैव दृश्यते ॥

Author :

Remarks—The explanatory verses are grouped together at the close.



॥ रूपप्रश्नः ॥

## 938. RŪPAPRAŚNA.

Substance—Palm leaf Size—4″ × 2″. Leaves—72. 4 lines per page and 8 letters per line. Script—Malayālam. No. of Granthas—72.

Subject—Beginning—Same as No. 936.

End.

पुत्रपौत्रादिलाभं च धनाद्या भोगसम्पदः ।
उत्साहं रत्नलाभं च गोविन्देनैव दृश्यते ॥

Author .

Remarks—Same as No 936.



॥ रूपप्रश्नः ॥

## 939 RŪPAPRAŚNA.

Substance—Palm leaf. Size—4″ × 1½″. Leaves—72. 4 lines per page and 8 letters per line. Script—Malayālam. No. of Granthas—72.

Subject—Beginning—Same as No. 936

End

सर्वनाशो विरोधश्च मरणं भीतिरेव च ।
वियोगो गात्ररोगश्च राक्षसेनैव दृश्यते ॥
सर्वकार्येषु साफल्यं तत्वज्ञानं मनो(ग्य ? ज्ञ)ता ।
सुश्रीकत्वं गुणप्राप्तिर्विष्णुदेवेन दृश्यते ॥

Author :

Remarks—Same as No. 936

---

॥ लघुभास्करीयम् ॥

## 940. LAGHUBHĀSKARĪYAM.

Substance—Palm leaf. Size—18″ × 1¾″. Leaves—10 7 lines per page and 52 letters per line. Script—Malayālam. No. of Granthas—225.

Subject—Same as No. 870.

Beginning ·

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
भास्कराय नमस्तस्मै स्फुटेयं ज्योतिषां गतिः ।
प्रक्रियान्तरभेदेऽपि यस्य गत्यानुमीयते ॥

काले महति देशे वा स्फुटार्थं यस्य दर्शनम् ।
जयत्यार्यभटः सोऽब्धिप्रान्तप्रोल्लङ्घिसद्यशाः ॥
नालमार्यभटादन्ये ज्योतिषां गतिवित्तये ।
तत्र भ्रमन्ति तेऽज्ञानबहलभ्रान्तिसागरे ॥
नवाग्न्येकाग्निसंयुक्ताः शकाब्दा द्वादशाहताः ।
चैत्रादिमाससंयुक्ताः पृथग्गुण्या युगाधिकैः ॥
ते च षट्त्रिकरामाग्निनवभूतेन्दवो युगे ।
भागहारोऽब्धिवरेवेकशराः स्युरयुताहताः ॥

End

लिप्ताशेषः कुजस्य द्विकघनगुणितो मूलदोरूपयुक्तः
सप्ताभ्यस्तः सरूपः पुनरपि चरदोर्वर्गराशिः स एव ।
इत्थं शेषं विचिन्त्य क्षितिजदिनगणौ वेत्ति यो वर्षपूगैः
स स्यादम्भोधिकाञ्च्यां गणितपटुधियामग्रगामी धरायाम् ॥
विस्तरग्रन्थभीरूणां ग्रहसद्वर्त्मवित्तये ।
निबन्धः कर्मणां प्रोक्तो भास्करेण समासतः ॥

Colophon

इति लघुभास्करीयेऽष्टमोऽध्यायः ।

Author—Bhāskara, probably the author of the Mahābhāskarīya (Vide No 13474, Vol XXIV DCSM Madras).

Remarks—The verses occurring after the colophon are quoted below

वाग्भावोनाच्छकाब्दाद्धनस्रतलयहान्मन्दवेलक्ष्यगागैः
प्राप्ताभिर्लिप्तिकाभिर्विरहिततनवश्चन्द्रतत्तुङ्गपाताः ।

शोभानीरूढसंविद्गणकनरहतान्मागरामा कुजाद्याः
संयुक्ता ज्ञारमौराः सुरगुरुभृगुजौ वर्जितौ भानुवर्जम् ॥

इष्टासुभ्यश्वराशुद्धौ व्यत्ययः शेषजीवया ।
प्राग्वल्लब्धं क्षितेर्मौर्व्या हित्वा शङ्कुः स्वकर्मणा ॥
विश्वगुणेषुच्छाया जिनसंख्याभाजिता पदच्छाया ।
सा छाया जिनगुणिता विश्वाप्ता तस्य शङ्कोः स्यात् ॥
नवांशाः पञ्चवर्गस्य भूतवर्गाश एव च ।
स्वतुरीयविलिप्ताभिर्युतहीने तनुः स्फुटे ॥
प्रसादतीर्थतुष्टोनं दिनं कृष्णोत्सवैर्हरेत् ।
सुश्राद्धस्ताटकैस्तत्र निःशेषेऽर्कज्ञयोर्युतिः ॥
तोटकार्थसमे शेषे प्रतिलोमयुतिस्तयोः ।
धीरतुल्यैर्दिनैः केन्द्रपदानि स्युः क्रमादिह ॥
आद्यन्तपदयोरणाद्यन्ययोः कर्कटादि च ।
क्रमादूने धनं शेषे त्वृणमभ्यधिके रवौ ॥
षडंशोनदिनैस्तुल्याज्यासंख्याघटिकाहतान् ।
ज्यान्तरं नतिभक्तात् स्वं परात्पत्वे त्वृणं क्रमात ॥
यद्वा भुजाफल द्विघ्नं... ...द्विघ्नमप्यधः ।
तत्स्वपञ्चांशहीनाद्याज्ज्यान्तराच्च यथोदितम् ॥
आद्यं शीघ्रफलं रक्ष्यमर्धित्वात्र कृते पुनः ।
पुत्रार्थदासतुष्टेन कलमाच्छैर्दिनं हरेत् ॥
वेदेशैश्चात्र निःशेषे योगः स्यादर्कशुक्रयोः ।
शेषे श्रीधरतुल्ये स्यात् प्रतिलोमयुतिः कवेः ॥
तावकैश्च पदानि स्युर्गाथिना द्वादशज्यका ।

मातुलेश्च षट्कृत्य ज्यान्तरघ्नाघशेषतः ॥
मातुलाप्तं धनं याते शैघ्र्ये त्याज्यं परात्पके ॥

---

## ॥ लघुभास्करीयम् ॥

### 941 LAGHUBHĀSKARĪYAM.

Substance—Palm leaf Size—$14\frac{1}{2}'' \times 1\frac{3}{8}''$ Leaves—17 5—7 lines per page and 36 letters per line. Script — Malayālam. No. of Granthas—225 Complete.

Subject—Same as No 870.

Beginning etc —Same as No 940.

Remarks—The leaves are much decayed and worm-eaten.

---

## ॥ लघुभास्करीयम् (सुन्दरीसहितम्) ॥

### 942. LAGHUBHĀSKARĪYAM with Sundarī.

Substance—Palm leaf. Size—$19\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—50. 7—8 lines per page and 64 letters per line Script—Malayāḷam. No. of Granthas—1500.

Subject—Same as No. 870.

Beginning :

...हाम्बरोरुपरिधिरित्यभिधीयते । तत्तुल्ययोजनानि ग्रहा युगतुल्येन कालेन गच्छन्ति । चन्द्रमसः स्वस्वयुगभगणास्तत्कक्ष्यायामेकस्याः कलायाः प्रमाणं दश योजनानीत्यागमेन विज्ञायते । भगणा... ... ... ...णयेत् । तच्चन्द्रस्य युगे योजनात्मिका गतिर्भवति । एतावन्त्येव योजनानि सर्वेषां ग्रहाणां युगतुल्यकालेन गतिः । स चाम्बरोरुपरिधितुल्या । उक्तश्च तदानयनम्—

"इन्दोर्गणाः खखवियद्रसवृन्दनिघ्ना
व्योम्नो भवेयुरिनवृत्तसमानसंख्याः" ॥

इति ।

End :

सममिति साम्यकरेणन लब्धं काकमानं २२७२. अनेन पूर्वराशिः का १३. का ४. का २१२ ॥ क ४१६. रू ४. इत्थमपि सौ जातौ राशी १४४. ९०४०४०६. १०९८०. १६४. एव पुनः पुनर्भावनयानीतज्येषु मूलैनैवान्यौ राशी स्यातामिति ।

Colophon :

इति ज्योतिषिकभट्टश्रीमदुदयदिवाकरविरचितायां सुन्दर्यभिधानायां लघुभास्करीयविवृतौ अर्कग्रहणाध्यायः पञ्चमः ।

इति लघुभास्करीयविवृतौ सुन्दर्यभिधानायां (नक्षत्रध्रुवाद्यध्या ? ग्रहयोगाध्या)योऽष्टमः । समाप्तेयं सुन्दरी ।

Author—Com : Jyotiṣikabhaṭṭa Udayadivākara.

Remarks—The Ms. abruptly begins with a fragment of the 7th chapter. The leaves are not numbered.

---

## ॥ लघुभास्करीयम् (सुन्दरीसहितम्) ॥

### 943. LAGHUBHĀSKARĪYAM with Sundarī.

Substance—Palm leaf. Size—14″×1¾″ Leaves—92. 8 lines per page and 10 letters per line. Script—Malayālam. No. of Granthas—940. Complete

Subject—Same as No. 870.

Beginning:

श्रीगणपतये नमः ।

नत्वा समस्तजगतामधिपं मुरारि-
माचार्यमार्यभटमप्यभिवन्द्य भक्त्या ।
यद् भास्करेण गुरुणा ग्रहतन्त्रमुक्त
लघ्वस्य विस्तृततरां विवृतिं विधास्ये ॥

तत्र तावदाचार्यः प्रथममेव भास्करीयं नाम ग्रहकर्मनिबन्धनं प्रतिपाद्य तदेव पुनः संक्षिप्तं चिकीर्षुस्तद्विघ्नप्रशान्तये भगवतो भास्करस्य प्रणाममाद्यश्लोकेनाचष्टे ।

End—Colophon—Author—Same as No 942

Remarks—Only 92 leaves constitute this Ms. notwithstanding the last leaf being numbered 97.

The leaves 10—16 are missing. The commentary on *Mahābhāskarīya* by Govindasvāmy is copied in the first 15 leaves with separate page numbers. After the colophon occur the following few lines:

श्रीपार्वतीवल्लभाय श्रीवटकोडवासिने ।
श्रीकण्ठाय प्रणम्राणां श्रीविद्यादायिने नमः ॥

൮൨൦-മാണ്ടു് മേടം ൨൮-ാംനു എഴുതി തീൎത്തിനെ ൧൦൩൩-ാമാണ്ടു് ധനുമാസം ൯-ാംനു പകൎത്തി എഴുതി തീൎത്തു. ശ്രീസുബ്രഹ്മണ്യസ്വാമി സഹായം.



## ॥ लघुभास्करीयम् (सुन्दरीसहितम्) ॥

### 944 LAGHUBHĀSKARĪYAM
### with Sundarī.

Substance—Palm leaf. Size—11″ × 1″. Leaves—120. 5—6 lines per page and 40 letters per line. Script—Malayālam. No. of Granthas—1650.

Subject—Same as No. 870.

Beginning—Same as No. 943

तेन त एवाक्षांशा भवन्ति । दक्षिणगोले . . . क्षभागाः प्रातिदिनं . . . . . भागैरु . . . . तानतभागा भवन्ति । यावतोपचितं तावद्विशोध्यते । येन त एवाक्षांशा अवशिष्यन्ते । . . . . . . . . पुनस्समममण्डलादुत्तरेणार्को मध्याह्नं करोति तदा

स्वाक्षभागेभ्योऽधिका उत्तरक्रान्त्यंशा भवन्ति । यावत् ...
तावन्तस्तद्दिने नतांशस्तैरूना ..... क्रियते ।

End:


येन स्वाक्षभागा भवन्ति । तस्मात् सर्वमुपपन्नं स्वदेशाक्षाग्रयो-
र्गोलं विन्यस्य प्रदर्शयेदिति ।

Colophon

इति ज्योतिषिकभट्टश्रीमदुदयदिवाकरविरचितायां सु-
न्दर्यभिधानायां लघुभास्करीयविवृतौ त्रिप्रश्नाध्यायस्तृ-
तीयः ।

Author—Same as No. 943.

Remarks—Almost all the leaves are torn and damaged. The work comprises only the first three chapters.



## ॥ लघुभास्करीयम् ( सुन्दरीसहितम् ) ॥

### 945. LAGHUBHĀSKARĪYAM
with Sundarī.

Substance—Palm leaf. Size—16″ × 1½″. Leaves—160. 6 lines per page and 45 letters per line. Script—Malayālam. No. of Granthas—2750.

Subject—Same as No. 870.

Beginning etc.—Same as No 943.

Remarks—The Mahābhāskarīyabhāṣya seems to have been copied on the first 16 leaves of

this Ms. The opening lines and the statement occurring after the colophon. "൯൨൦-ാമാണ്ടു മേടമാസം ൨൩-ാം൹ എഴുതിതീൻതിനെ ൧൦൩൩-ാമാണ്ടു ധനുമാസം ൯-ാം൹ പകൎത്തി എഴുതിതീൎത്തു." under No. 943 betoken that the beginning of this Ms. is bodily taken from it owing to the completely decayed condition of the latter.

---

## ॥ लघुभास्करीयम् (द्राविडभाषाविवरणोपेतम् ) ॥

## 946. LAGHUBHĀSKARĪYAM
### with Tamil commentary.

Substance—Palm leaf. Size—13¼″ × 2″. Leaves—64 10 lines per page and 32 letters per line. Script—Malayālam. No. of Granthas—1275.

Subject—Same as No. 870.

Beginning:

गणपतये नमः । अविघ्नमस्तु ।
करबदरसदृशमखिलं भुव(नं? नतलं) यत्प्रसादतः कवयः ।
पश्यन्ति सूक्ष्ममतयः सा जयतु सरस्वती देवी ॥
भास्कराय नमस्तस्मै स्फुटेयं ज्यो(तिषां ग)तिः ।
प्रक्रियान्तरभेदेऽपि यस्य मत्यानुमीयते ॥
काले महति देशे वा स्फुटार्थं यस्य दर्शनम् ।
जयत्यार्यभटः सोऽब्धिप्रान्तप्रोल्लङ्घिसद्यशाः ॥
नालमार्यभटादन्ये ज्योतिषां गतिनिश्चये ।
तत्र भ्रमन्ति तेऽज्ञानबहळध्वान्तमागरे ॥

नवाद्र्येकाग्निसंयुक्ताः शकाब्दा द्वादशाहताः ।
चैत्रादिमाससंयुक्ताः पृथग् गुण्या युगाधिकैः ॥
ते च षड्त्रिकरामाग्निनयभूतेन्दवो युगे ।
भागहारोऽब्धिवस्वेकशराः स्युरयुताहताः ॥
अधिमासान् पृथक् तेषु प्रक्षिप्य त्रिशताहतैः ।
युक्त्वा दिनानि यातानि प्रतिराश्य युगात्ययैः ॥
संगुणय्याम्बराष्टेषुद्व्यष्टशून्यशराश्विभिः ।
छेदः खाष्टत्रियद्योमखखाग्निखरसेन्दवः ॥
लब्धान्यवमरात्राणि तेषु शुद्धेष्वहर्गणः ।
वारः सप्तहृते शेषे शुक्रादिर्भास्करोदयात् ॥

ഇതിന്റെ പൊരുൾ नवाद्र्येकाग्निसंयुक्ताः शकाब्दाः ശകാബ്ദത്തെ വച്ചു ഇതിലെ നവാദ്ര്യേകാഗ്നിയാകിൻറ നൻമൻഇവററെക്കൂട്ടി നിൻറതു കലിയുഗസംവത്സരം ഇ ക്കലിയുഗവർഷത്തെ द्वादशाहताः പന്തിരണ്ടിൽ പെരുക്ക. പെരുക്കിനിന്ന സ്വരൂപം താനെണ്ണുകിൻറ ആണ്ടിൽ ചി ത്തിരവിഷുവിന്നുമുൻപു് കലിയുഗം പിറന്ന അൻറുതുടങ്ങി യുള്ള മാസങ്ങളാം.

End

नतापक्रान्तिभागानां योगो भानावुदक्स्थिते ।
विश्लेषे व्यत्यये कार्यश्छायायाश्च फलं भवेत् ॥

ഇതുക്കപൊരുൾ. ആദിത്യനുത്തരഗോളഗതനായി ചരായ്ക്കു മുദക്സ്ഥിതനായപൊതു നതിഭാഗത്തെയും അപക്രമഭാഗത്തെ യും കൂടി അക്ഷഭാഗമാം ആദിത്യൻടയ ഗോളത്തുക്കു് ച്ഛായ യെ വിപര്യയദിക്സ്ഥയാ- .. .. .. ..

.. . .

മ ഭാഗങ്ങളിരണ്ടെയും പെരിയതിൽചെറിയതു കളെയ അകാ ഭാഗമാം. ഉദാഹരണം .. ... ...

ധ൨. തി--തിംകൾക്കിഴമമദ്ധ്യാഹ്നത്തുക്ക എണ്ണി വന്നതി ഭാഗം. ൩൨൭ൗ അപക്രമഭാഗം ൨൨൩. ആദിത്യൻ ദക്ഷി ണഗോളഗതനായി ച്ഛായ ഉദക്സ്ഥിതനാകയാൽ പെരിയ തിൽ ചിറിയത്തു കളെത്തുന്നിൻെറ അക്ഷഭാഗം. ൻ.൨.൩.

Colophon

इति लघुभास्क(र्ये?रीय)विवरणे त्रिप्रश्नाध्यायस्तृतीयोऽध्यायः ।

Author—Text Same as No 940.

Remarks—The Ms contains only the first three chapters.

---

## ॥ लघुमानसकरणम् ॥

## 947 A LAGHUMĀNASAKARANAM.

Substance—Palm leaf Size—$15\frac{1}{2}'' \times 1\frac{1}{4}''$ Leaves—4 8 lines per page and 30 letters per line Script—Malayālam No of Granthas—60.

Subject—Astrological computation.

Beginning

गणपतये नमः ।

प्रकाशादित्यवत् ख्यातो भारद्वाजो द्विजोत्तमः ।
लघ्वपूर्वस्फुटोपायं वक्ष्येऽन्यल्लघुमानसम् ॥
चैत्रादौ वारसङ्क्रान्तितिथ्यर्केन्दू च सद्भवात् ।
ज्ञात्वान्याश्चार्कवर्षादावजेन्म? गणयेत्ततः ॥

End

नृपवर्गेऽर्धितश्छेदः शुक्लाप्ता भूभमण्डले ।

बिम्बापा?दिशोभागात्...............: शुक्लकृष्णयोः ॥
शुक्लान्ता(द्) बिम्बमध्यस्पृक् छेदाग्रच्छेदनं छिदा ।
मानसाख्यं ग्रहज्ञानं श्लोकषष्ट्या मया कृतम् ॥
भवन्त्यत्रायशोभाजः प्रतिकञ्चुककारिणः ॥

Colophon:

इति लघुमानसे चतुर्थोऽध्यायः ।

Author—Muñjālakācārya The TCM, Madras, (Vol. 24, p. 9101) notices an identical work attributed to Mañjulācārya, a native of Prakāśa in north India. He was a Brahmin of the Bhāradvājagotra. The line वक्ष्येऽन्यल्लघुमानसम् implies that he wrote a bigger work on the subject.

Remarks—The Ms. comprises four chapters only. The following lines after the colophon point out the principles to be followed in the calculation of days, weeks etc.

मासोनंगेसवस्योनाद् द्युगुणान्मातुलैः ममा ।
अष्टघ्नाच्छेपसंयुक्तात् सूर्यवाराद्यहर्गणः ॥

मध्यमध्रुववाक्यानि । श्रीचक्रिवर्गः स्याद्रवेः । रुद्रो जयी पूज्यः चन्द्रस्य । नरोसौ चन्द्रोच्चस्य । अनन्तो रौद्रः कुजस्य । दैवतप्रभुः बुधस्य । धनदः बृहस्पतेः । लीलांगो ज्ञानाढ्यः शुक्रस्य । धत्रो हरति मन्दस्य । क्षमी धनदः राहोः । स्फुटमन्दोच्चवाक्यानि । दुष्टा स्त्री रवेः । चन्द्रस्फुटस्य पूर्वोक्तवाक्यमेव । सूनवे कुजस्य । नित्योऽसौ बुधस्य । श्रीरामा बृह-

स्पतेः । अक्रूरः शुक्रस्य । सानुजः शनेः । राहोर्नास्ति ।
श्रीकृष्णाय नमः । श्रीगुरुभ्यो नमः । श्रीगोकर्ण-
तुष्टोनः ।

---

## ॥ भाषासंग्रहः ॥

### 947 B. BHĀṢĀSAṄGRAHA

Substance—Palm leaf. Size—15½″ × 1½″ Leaves—8 8 lines per page and 44 letters per line Script—Malayālam No of Granthas—175.

Subject—Same as No 876 A

Beginning ·

श्रीमहागणपतये नमः ।

ज्योतिःश्रेष्ठमहं वन्दे सहस्रकिरणं रविम् ।

दिनेशममरस्तुत्य जग ... ... ... ... ॥

. കളുഞ്ചൂടിൻറവൻെറ മുൻപിലെ മകൻ

മമാനമുകമൊള്ളപ്പനകലെ പൊക്കകാപാദഃ

വക്ഷ്യേ നമസ്കരിച്ചിട്ടു വിജ്ഞൊാത്തും ഭൂതനാഥനെ

ബാലാനാം പൊഴുതുമാത്തും ഭാഷാസംഗ്രഹമിത്യഹം

चक्रार्धं मूर्तिवैधृतं च गुलिकाः सन्ध्याहिमस्तं विषं

गण्डान्तं नवदोषकेतुजनन मायाह्नमेकार्गलम् ।

संक्रान्तिग्रहणं च दग्धमशनीविष्ट्युल्कभूकम्पनं

षड्दोषं बहुळं च याम्यमयनं चोष्ण च शुक्रेक्षणम् ॥

End

മൂലംഭരണ്യാംയിലയംവിശാഖം

പൂരംപൂരട്ടാതിമഖാർദ്രചിത്രാ

പൂരാടമത്തം തിരുവോണചോതി
രോഹിണ്യമീനൻറു ഗൃഹംനിറെപ്പാൻ.
പൂർവ്വാഹ്ണം പൂർവ്വപക്ഷംച കാർന്നോക്കം വേലിയേററവും
കുംഭപൂർത്തി സ്ഥിരം പൂർണ്ണം മദ്ധ്യാഹ്നം പൂരണോ ശുഭം.
ലഗ്നത്തിലേഴിലും പററാ പാമ്പുചെവ്വാ ചരാണി ച
കാടിവെപ്പാറും നിറപ്പാനും ശോഭനം ഗുളികോദയം
ദിഗ്നാളിൻവെച്ചുനടുവി(ലേ?ൻ) വഥകാത്ത്യതൊട്ടു
ത്രുൺനാലുകീഴ്പരി(മൃമ്മൃ?മൃ)ൻറാരുവർഗ്ഗമെൻറു
(അ?)വർഗത്തിൽവെച്ചു കതിരോന്ഥനിൻറുവർഗ്ഗം
കൊള്ളവില്ലുസത്തുക്കളെ നിറപ്പാൻ ന ച കുംഭപൂർത്തി
നിറപ്പാനെവംവിധി ഉത്ത്രാടമുത്രം

Colophon .

Author .

Remarks—The closing 11 leaves comprise detached portions of other codices dealing as they do with various topics such as अधिकमासपतन, लघुमानसकरण, चन्द्रग्रहण, महाज्यानयन, युगाहर्गणानयन, बालारिष्ट" etc. Fragments of some verses with glosses in Malayālam are also seen here and there in the Ms.

---

## ॥ लघुमानसकरणम् ॥

### 948. LAGHUMĀNASAKARANAM.

Substance—Palm leaf Size—8″ × 1¼″. Leaves—18. 7 lines per page and 22 letters per line. Script—Malayālam. No. of Granthas—180. Incomplete.

Subject—Same as No. 870.

Beginning, End, Remarks—Same as No. 947 A.

---

## ॥ लघुमानसकरणम् (मानसग्रहज्ञानवासनोपेतम्) ॥

### 949. LAGHUMĀNASAKARAṆAM
with Mānasagrahajñānavāsanā

Substance—Palm leaf Size—22″ × 2″ Leaves—52. 8—9 lines per page and 80 letters per line Script—Malayālam No of Granthas—2200. Incomplete.

Subject—Same as No. 870.

Beginning

हरिः । श्री ... ... ...

श्रीसूर्यादिसर्वग्रहेभ्यो नमः ।

... ... याय प्रतोदहस्तं प्रगृहीतरश्मिम् ।

देवं प्रपद्ये वसुदेवसूनुं ... ... ... ... ... ॥

... ... ... ... ।

... ... ... देवेन यज्वना ।

मानसाख्यग्रहज्ञानवासनाद्य प्रकाश्यते ।

यम्मज्ञी ... ... समा . . .साक्षात् परंपरया च धर्मज्ञानोपायभूतानि चतुर्दश विद्यास्थानानि स्मर्यन्ते ।

पुराणन्यायमीमांसा ... ... ... ... ... ।

... ... ... ... ताः ॥

पादाः स्थानानि विद्यानां धर्मस्य तु चतुर्दश ।
तथा,
अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥

End :

एव सर्वेषां मध्यमव्यासस्फुटव्याम ... ... ... दोत्पत्तिः युक्तिदृक्त्वसाम्यासिद्धा वेदितव्या । अथ श्लोकोत्तरार्धेन स्वोक्त- ... ... ... ... ... ... या गणितेषु अर्कभौमबुधगुरुभृगु-शनिमध्यमेषु भौमादीनां ग्रहमध्यमविभागं शीघ्रोच्चविभागश्चाह— ताराग्रहार्कयो ... श्शीघ्रोच्चमितरो ग्रहः । ... ... ... ताराग्रह

Colophon ·

एवं तृतीयश्लोको व्याख्यातः ।

Author—Text Muñjālakācārya.
Com : Sūryadevayajvā.

Remarks—The Ms extends from the opening chapter, *Madhyamādhikāra* up to the commentary on the 4th śloka of the 2nd Adhikāra. It is old and damaged



## ॥ लीलावती ॥

## 950. LĪLĀVATĪ.

Substance—Palm leaf. Size—7½" × 1⅝". Leaves—

57. 9 lines per page and 24 letters per line. Script—Malayālam. No. of Granthas—800. Complete.

Subject—Arithmetic.

Beginning.

हरिः श्री । श्रीगणपतये नमः । अविघ्नमस्तु ।

(प्रीतिं भक्तजनस्य यो) विदधते विघ्नं विनिघ्नन् स्मृत-
स्तं वृन्दारकवृन्दवन्दितपदं (नत्वा) मतङ्गाननम् ।
पाटीं सद्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटां
संक्षिप्ताक्षरकोमलामलपदैर्लालित्य लीलावतीम् ॥

वराटकानां दशकद्वयं यत् सा काकणी ताश्च पणश्चतस्रः ।
ते षोडश द्रम्म इहावगम्यो द्रम्मैश्च तैः षोडशभिश्च निष्कः ॥

End

न गुणो न हरो न कृतिर्न घनः पृथुलस्तथापि दुष्टानाम् ।
गर्वितगणकानां यच्चेतोऽवश्यं न वै चकास्त्यस्मिन् ॥

येषान्तु जातिगुणवर्गविभूषिताङ्गी
शुद्धाखिलव्यवहृतिः खलु कण्ठसक्ता ।
लीलावतीह सरसोक्तिमुदाहरन्ती
तेषां सदैव सुखसम्पदुपैति वृद्धिम् ॥

Colophon.

इति लीलावत्यां गणितपाठ्यां अङ्कपरिमाणव्यवहारः समाप्तः ।

इति लीलावती समाप्ता । हरिः ।

Author—Bhāskarācārya.

Remarks—The Ms is available in print at Benaros
Several leaves are completely mouldered

---

## ॥ लीलावती ॥

## 951 LĪLĀVATĪ

Substance—Palm leaf Size—$12\frac{3}{4}'' \times 1\frac{1}{2}''$ Leaves—42 7—8 lines per page and 40 letters per line. Script—Malayālam. No of Granthas—800. Complete.

Subject etc —Same as No. 950.

Remarks—The leaves are damaged. The following Malayālam verse praising the King Kuriyūr occurs immediately after the colophon·

മുന്നം തന്നേ മനക്കാമ്പഴകത്തു മഹതാമ്മാൎഗ്ഗമോക്കി
ന്റതെല്ലാ-
പിന്നെത്താനുണ്ടനേകം പ്രയതനമയി തേ നല്ലതിന്നു-
ന്നതാത്മൻ
മന്നിൽ ചൊല്ലേണ്ടുമേററം തവ മനുജപതേ പൊങ്ങുമാറ-
ണ്ടുമേൽമേ-
ലിന്നുന്നീ പുണ്യമുന്നിച്ചരുളുക **കുരിയൂർ മന്നവാ** ധന്യ-
കീൎത്തേ.

---

## ॥ लीलावती ॥

## 952 LĪLĀVATĪ

Substance—Palm leaf. Size—$17\frac{3}{8}'' \times 2\frac{1}{8}''$. Leaves—

19 9—12 lines per page and 60 letters per line. Script—Malayālam. No. of Granthas—800. Complete

Subject etc —Same as No 950

Remarks—The leaves are decayed. The following verses bring the work to a close ·

चापादिकलितहस्ता रुद्रा दशबाहवः प्रसीदन्तु ।
त्रिप्रयुतनियुतपट्कद्व्ययुतसहस्राष्टकाष्टशतसंख्याः ॥
नानादेहरतो गानी क्षेत्रज्ञो यदनुग्रहात् ।
निमुच्यते भयात् तस्मै परस्मै शम्भवे नमः ॥
दिङ्मात्रविषया सौम्ये याम्य पञ्च दिशो भवाः ।
सौम्ये रसाः खं याम्ये गाः खं सौम्येऽर्कास्त्रयोदश ॥
दक्षिणे रुद्रयमलौ सप्तत्रिंशत् तथोत्तरे ।
याम्ये द्व्यर्धत्रिककृता नवसार्धशरेषवः ॥
उत्तरस्यां तथा षष्टिस्त्रिंशत् षट्त्रिंशदेव हि ।
दक्षिणोऽतोऽर्धभागं तु चतुर्विंशतिरुत्तरे ॥
भागाः षड्विंशति खं च दस्रादीनां यथाक्रमम् ।
सूर्यसिद्धान्त ... ... ... ...

---

## ॥ लीलावतीव्याख्या ॥

### 953 LĪLĀVATĪVYĀKHYĀ.

Substance—Palm leaf Size—$7\frac{5}{8}'' \times 1\frac{3}{8}''$ Leaves—78 9 lines per page and 36 letters per line Script—Malayālam. No. of Granthas—1605. Complete.

Subject—Same as No 950

Beginning·

हरिः । श्री ... ... ... ... ...

... ... ... ...

... ... नमूर्त्तिरनाद्यन्तो हरिरिष्टं ददातु नः ॥

प्रणम्य पार्वतीपुत्रं श्रीरुद्रञ्च कृपानिधिम् ।
व्याख्यानमस्मै बालाय लीलावत्याः करोम्यहम् ॥

इष्टदेवतास्तुतिपूर्वकं चिकीर्षितमाह—प्रीतिमिति । सद्गणितस्य पाटीं विचित्ररूपस्य गणितस्य परिपाटीमनुक्रमं लीलावतीति संज्ञितां वच्मि । लालित्य लाळयित्वेत्यर्थः । केचिच्छब्दशुद्ध्यर्थ लाळित्यलीलावतीम् इत्येक पदमिति वदन्ति । तत्पक्षे गणितपाट्या लीलावतीति विशेषणं सिध्यति । अथ व्यवहारसिद्ध्यर्थं पणादिद्रव्य-संज्ञामाह—वराटकानामिति ।

End .

न गुणो न हरो न कृतिर्न घनः ... ... नाम् ।
गर्वितगणकानां स्याच्चेतोऽवश्य न वै चकास्त्यस्मिन् ॥

गुणहारादीनां पृथुत्वाभावेऽप्यस्मिन् शास्त्रे दुष्टगणकानां न प्रवेश इत्यर्थः ।

अथोपसंहरति—

येषां तु जातिगुणवर्गविभूषिताङ्गी
 शुद्धाखिलव्यवहृतिः खलु कण्ठसक्ता ।
लीलावतीह सरसोक्तिमुदाहरन्ती
 तेषां सदैव सुखसम्पदुपैति वृद्धिम् ॥

इति । जातिः गुणश्च वर्गश्च जातिगुणवर्गाः । अथवा योषिज्जातिसमूहो जातिगुणवर्गः ।

Colophon:

श्रीमद्रुद्रस्य शिष्येण लीलावत्याः कृतं मया ।
परमेश्वरनाम्नैवं व्याख्यानं हरये नमः ॥
नारायणेन लिखितमिदम् ।

൮൦൯-ാമാണ്ടു കന്നിമാസം ൧-ാംനു എഴുതി ..

Author—Text Bhāskarācārya.
Com. Parameśvara, disciple of Rudra.

Remarks—Only the initial words of the text are quoted in the Ms But the last two verses are copied down fully and commented upon in detail.

---

## ॥ वाक्यम् ॥

## 954. VĀKYAM

Substance—Palm leaf Size—$8\frac{1}{2}'' \times 1\frac{3}{8}''$. Leaves—15 4 lines per page and 16 letters per line Script—Malayālam No of Granthas—60. Complete

Subject—Formulary sentences on the calculation of the position of the planets

Beginning ·

गीर्नःश्रेयः । धेनवःश्रीः । रुद्रस्तु नम्यः । भवो हि याज्यः ।

धन्येयं नारी । धनवान् पुत्रः । गृह्या सुरा गङ्गा । बालेनाकुलम् ।
धनुर्भिः खलैः । दश सूनवः ।

End :

मन्त्रितं प्राज्ञाय । अनुयानं कपेः । श्रोत्रियः प्रियस्य । मङ्गलम् । कवेः शक्यम् भवेत्सुखम् ।

Colophon

हरिः ।

Author—Vararuci.

Remarks—The last Fol embodies the following

भवेत्सुखस्य राशीनामर्धवाक्यं तु मध्यमम् ।
आदिवाक्यमुपान्त्यं च भवतीति भवेत्सुखम् ॥

ഇതു വാക്യം വരുത്തുവാൻ—होमाश्रुत्वा-शशीकुशा - रम्नम्र-मोदाकामजनोन्ध-दयावान् जनोमा कविः पापः, सेना अम्बु, धर्मभोगानाग्रोआज्ञा तावत् सलिलं, गुरुरप्रियः, त्रिराज्ञायोगः ।

---

## ॥ वाक्यं, वाक्यकरणं च ॥

## 955. VĀKYAM AND VĀKYAKARAṆAM

Substance—Palm leaf Size—$16\frac{5}{8}'' \times 1\frac{1}{2}''$. Leaves—10. 8 lines per page and 42—54 letters per line. Script—Grantha No. of Granthas—240. Incomplete.

Subject—Determination of week days, the position and movement of the planets etc.

Beginning

श्रीलक्ष्मीनृसिंहपरब्रह्मणे नमः ।

प्रणम्य करिशैलस्थं महः कमललोचनम् ।
भास्करीयानुसारेण गणितं क्रियते लघु ॥
षष्टिश्चतुर्विंशतिघ्ना गतवत्सरसंयुता ।
नववेदाग्निभिर्युक्ता चेच्छकाब्दाः प्रकीर्तिताः ॥
धुंमीकालयुताः शाकाः कल्यब्दा इति कीर्तिताः ।
कल्यब्दो मातुलगुणो वर्षपांशेन संयुतः ॥
पुनरब्दान्मानगुणात् सालप्रियविवर्जितात् ।
तत्समाप्तैर्दिनैर्युक्तं शुक्रवारादिकं दिनम् ॥

End

सुरतं स्त्रीभिः । त्रिरात्रं कुशः । धाराभिः श्रमः ।

Colophon

इति श्रीवाक्यकरणे तिथ्याद्यानयनं नाम प्रथमोऽधिकारः ।
हरिः ओं ॥

Author ·

Remarks—The Ms. contains the 1st *prakarana* in *Vākyakarana* and the whole of *Vākyagrantha.* The opening stanza is identical with that of Ms No. 13495, DCSM. Madras Vol 24, but the variants are really noteworthy. The last two leaves in the Ms contain the पर्जन्यशान्तिकरण

---

## ॥ वाक्यं (केरलभाषामिश्रम्) ॥

### 956. VĀKYAM
with Malayālam commentary

Substance—Palm leaf. Size—9″ × $1\frac{1}{2}$″. Leaves—

12. 6 lines per page and 24 letters per line. Script—Malayālam. No. of Granthas—100

Subject—Beginning—Same as No. 954.

End ·

वारनक्षत्रतिथयः करणं योग इत्यपि ।
पञ्चाङ्गं पठतो नित्यं गङ्गास्नानं दिने दिने ॥
तिथेश्च श्रियमाप्नोति वारादायुष्यवर्धनम् ।
नक्षत्रं कृतपापसंगमहरं योगस्तु रोगापहो
(यश्चित्ते स्वितांशु तत्र करणां योगमित्यपि ।
पञ्चाङ्गं पठते नित्यं गङ्गास्नानं दिने दिने ?) ।

Colophon :

ഇതു സുഗ്രീവപ്രശ്നം

Author .

Remarks—The Ms. contains certain textual sentences with their explanation in Malayālam Besides, it points out the auspicious time for the transaction of monetary business and the influences of certain asterisms The following verse.

अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

is seen in addition to the introductory portion included in No. 954

---

## ॥ वाक्यं (केरळभाषामिश्रम्) ॥

### 957. VĀKYAM
with Malayālam commentary.

Substance—Palm leaf. Size—6½″ × 1½″. Leaves—

28. 7—8 lines per page and 20 letters per line
Script—Malayālam. No of Granthas—250

Subject—Beginning—Same as No. 954.

End :

വെധന്തൊളാട്ടകൊൽ ഞെട്ടകെപ്പിച്ച്യൂർദ്ധ്വമുഖെക്ഷിപേൽ.
കാനാളിൽ കമുകും തെങ്ങും പിലാവും കേന്ദ്രഗെ ഗ്രഹെ

Colophon .

ഇതു യാത്രാവിധിഃ

Author

Remarks—Same as No 956.

---

## ॥ वाक्यं (केरलभाषामिश्रम्) ॥

## 958. VĀKYAM.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—19.
7—8 lines per page and 24 letters per line
Script—Malayālam. No of Granthas—200.

Subject—Beginning—Same as No. 954.

End .

•प्रथमायां सुपुत्रः स्याद् द्वितीये तु तथैव च ।
तृतीये धनपुत्रस्य चतुर्थी परसक्तिका ? ।।
पञ्चम्यां पुत्रवत्यां च........

. . .

Colophon .

ഇത സപ്തജ്യാവു്

Author

Remarks—The Ms embodies a few verses on the influences of constellations

---

## ॥ वारनक्षत्रफलानि ॥

### 959. VĀRANAKṢATRAPHALĀNI.

Substance—Palm leaf Size—$12\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—10. 6 lines per page and 30 letters per line Script—Malayālam No of Granthas—100

Subject—The effects of tho planetary position

Beginning :

आत्मज्ञानी सदा शूरः पैत्तिकः प्रियवल्लभः ।
चतुरश्रतनुः श्रीमान् रविवारे प्रसूयते ॥
प्रसन्नवदनः कामी स्त्रीणां च प्रियदर्शनः ।
मृदुकायोऽल्पवचनः चन्द्रवारे प्रसूयते ॥

End

व्याघातादिषु मूर्ध्निभन्तु कथितं तत्रैव रेखास्थयोः
सूर्याचन्द्रमसोर्मिथो निगदितो दृक्पात एकार्गलः ।
खर्जूरदेशे इ.... .... ..ह्वः
केचित् प.........खर्जूरदनिभेरखतः
मेघेन्द्रग्न्यम्बुपौष्णात्त.....

Colophon :

Author:

Remarks—The Ms. is much decayed. The work is a cento of verses from the 16th chapter of *Hora*, *Laghumānasa* etc The leaves are not arranged in order.

---

## ॥ वाररुचिकम् ॥

## 960. VĀRARUCIKAM.

Substance—Palm leaf Size—12″ × 1½″ Leaves —60 6—7 lines per page and 32 letters per line. Script—Malayālam. No. of Granthas—800.

Subject—The rules based on the time for starting on a journey and consecration of duties.

Beginning.

.... .... .... .... ..

.... .... त्रोऽङ्गिराश्च ।

राश्यंशकाधिपतयः क्रमशस्त्वजाद्या

राश्यंशका विचिन्त्या ज्ञार्कज.... ...र्कजशुक्रसौम्याः ॥

शुक्रार्किसौम्याः शशिवक्रजीवा द्रेक्काणपा राशिचतुष्टये क्रमात् ।

मेषादिसिंहादिधनुर्धरादिरपि शशिपरिवेषसंज्ञः । (?)

तिर्यग्वक्र कांक्षितो भास्करेण

तेषां केन्द्रेष्वेत्रमेव प्रकल्प्यम् ।

पुंस्त्रीस्वभावसदृशौ विषमेतराख्यौ
भौमार्किदेवमन्त्रिवाः पुरुषस्वभावाः ।
नारीस्वभावफलदौ शशिदानवेज्यौ
सौम्यौदगार्कितनयानि नपुंसकानि ॥ १

End:

पातालाम्बरपञ्चमाद्रिनवमे लग्ने च सौम्यग्रहाः
क्रूराः षष्ठगतः (शशी धनगतः) सर्वे त्रिकैकादशी । १
यात्रारम्भविवाहकार्यसमये कुर्युर्नृणां सम्पदं
जामित्रे ग्रहवर्जिते परिणय शंसन्ति सम्यग्बुधाः ॥

Colophon:

इति वाररुचिके देवप्रतिष्ठाविधिर्द्वादशोऽध्यायः ।
इति वाररुचिकं समाप्तम् ।

Author—Vararuci

Remarks—The first and the 59th leaves are missing. The Ms. is damaged.

---

## ॥ वाररुचिकम् ॥

### 961. VĀRARUCIKAM

Substance—Palm leaf. Size—13″ × 2⅛″. Leaves—31. 11 lines per page and 40 letters per line Script—Malayālam. No. of Granthas—850.

Subject—Same as No. 960.

Beginning

.... .... .... .... .... ....

. . . . . .पूर्वत्र. . . . .पाप. . . . त्रौ. . .

.... .... .... ....

.... ....मञ्च सतत.... ...-ज्र्जनीया: ।

End—Colophon—Author—Same as No 960.

Remarks—The Ms. is too frangible to be touched After the colophon the name of the scribe is noted thus —'परमेश्वरेण पुस्तक लिखितम्'



## ॥ विद्वज्जनवल्लभम् ॥

### 962 VIDVAJJANAVALLABHAM.

Substance—Palm leaf Size—$8\frac{3}{8}'' \times 1\frac{1}{2}''$. Leaves—15 9 lines per page and 32 letters per line Script—Malayālam No of Granthas—275. Complete

Subject—Beginning –Same as No 876 H

End ·

आज्ञैवाखिलवारिराशिरशनावच्छेदिनीं मेदिनीं
शास्त्येकां नगरीमिव प्रतिहतप्रत्यर्थिनो यस्य सा ।
प्रश्नज्ञानमिदं स पार्थिवशिरोविन्यस्तपादाम्बुजः
श्रीविद्वज्जनवल्लभाख्यमकृत श्रीभोजदेवो नृपः ॥

लाभालाभौ द्विषतां समागमोऽप्यथ गमाख्यश्च ।
स्यात् प्रोषितगमोऽत्र च यात्राफलसंज्ञिताश्च तथा ॥
तदनु च जयाजयाख्यं सन्ध्यात्रयसंज्ञितावपरौ ।
बन्धनमोक्षौ नीरोगता च कन्याप्त्यनाप्त्याख्या ॥
गर्भोत्पत्तिः स्त्रीपुत्रजन्मसंज्ञोऽथ वृष्टयवृष्ट्याख्यः ।
नष्टाप्त्यनाप्तिसंज्ञो मिश्रकाचिन्तनविधानौ च ॥

Colophon·

इति प्रश्नज्ञाने श्रीभोजदेवविरचिते विद्वज्जनवल्लभाख्ये चिन्तनं नामाष्टादशोऽध्यायः । शुभमस्तु ।

Author—Same as No 876 H

Remarks—The Ms. is in fairly good condition. The following stanza is seen at the close·

. . . लिप्ताङ्गमुनिद्वीपपङ्क्तिहताहृतम् ।
षष्ट्यार्कसप्तविंशार्कैर्वर्षमासर्क्षमूर्तयः ॥

This work is identical with R No. 2596 (b), TCM. Madras, Vol. III, Part I, Skt. B The 18th chapter is also seen in this Ms besides the portion found in the former

---

## ॥ विद्वज्जनवल्लभम् ॥

## 963. VIDVAJJANAVALLABHAM.

Substance—Palm leaf. Size—$7\frac{1}{8}'' \times 2\frac{3}{4}''$. Leaves—7. 9 lines per page and 20 letters per line. Script — Malayāḷam. No. of Granthas—75. Incomplete.

Subject—Beginning—Same as No. 876 H.

End

लग्ने कुजेन्दू षष्ठे च शशाङ्कसुतशुक्रयोः ।
बधः स्यान्मन्त्रिणः सूर्ये निधनस्थानवर्तिनि ॥
प्रष्टुः सुतवधः पापैर्विलग्नात् पञ्चमोपगैः ।
भङ्गः स्याल्लग्नगे भौमे सेन्दौ मन्दावलोकिते ॥

Colophon ·

इति प्रश्नज्ञाने गमागमाध्यायस्तृतीयः ।

Author—Same as No 876 H.

Remarks—The Ms. comprises only the first 5 chapters The lines omitted are marked by asterisks in the Ms.

---

## ॥ शाकुनचिन्ता ॥

### 964 ŚAKUNACINTĀ.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—5 8—10 lines per page and 54—68 letters per line Script—Malayālam. No. of Granthas —75. Incomplete.

Subject—Effects arising from omens

Beginning:

... ... ... ... ...
... ... दर्शने तुङ्गसंश्रये ।
प्रीतौ प्रीतिममा . . . .प्रष्टुर्जयं वदेत् ।
स्थानादन्यत्र याते तु स्थानदोस्थयात् पलायनम् ॥

पृष्ठोदये धीशुभस्थे क्रूरखेटे च तद् वदेत् ।
शिरसश्चोरसो दक्षबाहोः शस्त्रस्य च स्पृशः ॥
कस्यचिच्छेदनं भेदं ताडनं चापि ये नराः ।
कुर्वन्त्युत्तुङ्गदेशस्था ऊर्ध्वास्ये शीर्षभेऽपि च ।

End·

पञ्चरोगादिकस्तत्र कलहामिषकाङ्क्षिणः ।
आपगातरिका मत्ता न ग्राह्या शकुने क्वचित् ॥
इत्यादिशकुनभेदमवलोक्य शुभाशुभम् ।
फल वदतु दैवज्ञः सर्वकार्येषु सर्वदा ॥
राशिग्रहाणां स . . . .विज्ञेयं बलाबलम् ।
शकुनैर्जातसंवादो राशिग्रहफलं स्फुटम् ॥

Colophon:

इति युद्धादिशकुनचिन्ता ।

Author.

Remarks—The closing leaves deal with युद्धयोगपीठ, निस्थयोग, वार, तिथि, करण, आयुधलक्षण, युद्धे जयापजयनिर्णय etc., with comments in Malayālam These portions are incomplete

॥ श्लोकपञ्चाशिका ॥

965 ŚLOKAPAÑCĀŚIKĀ.

Substance—Palm leaf. Size—10″ × 1¼″. Leaves—4 7 lines per page and 32 letters per line. Script — Malayāḷam. No of Granthas—50. Complete.

Subject—The benefits and defects of *Muhūrtas* pertaining to marriage etc.

Beginning:

गुरून् भक्त्या नमस्कृत्य तत्प्रसादाद् यतामहे ।
विवाहादिप्रतिष्ठान्तकर्मणां कालवित्तये ॥
वर्ज्य . . . . लग्ने ते च शुक्रश्च सप्तमे ।
चन्द्रः षष्ठाष्टमान्त्येषु गण्डान्तोष्णविषाणि च ॥

End:

. . . .तुलाः पापान् पञ्चमेऽन्त्ये शुभेऽष्टमे ।
अभिषेकादिकं कृष्णपञ्चम्यां प्रागपीष्यते ॥
त...क्षेऽयने याम्ये अष्ट . . . विधीयते ।
यथाचारकृतामेतां श्लोकपञ्चाशिकां पठेत् ॥
विवाहादिषु कालादिवि . . . . निवृत्तये ।

Colophon

इति श्लोकपञ्चाशिका समाप्ता ।
शिवम् । श्रीवेदव्यासाय नमः । श्रीगुरुभ्यो नमः ।
श्रीगणपतये नमः ।

Author·

Remarks—The Ms. is much old Besides the text the following verse,

प्राच्यादौ मेषचापौ हरिबतहुतभुग्दक्षिणे गो . . . स्यात्
कन्यानैर्ऋत्यमेतद् घटमिथुनयोः पश्चिमस्यां दिशायाम् ।
कौबेर्यौ कर्किमीनावनिलमिति तुलावृश्चिके शान्तदिक्षु
इत्येते राशिवर्ज्यं...गमनमशुभदं प्राणहानिं वदन्ति ॥

is seen at the close. The arrangment of leaves is not in order.

---

॥ षट्पञ्चाशिका ॥

966 ṢAṬPAÑCĀŚIKĀ.

Substance—Palm leaf. Size—13″ × 2″. Leaves—4. 7 lines per page and 44—48 letters per line Script—Malayālam No of Granthas—75.

Subject— Same as No 893.

Beginning

हरिः श्रीगणपतये नमः ।
प्रणिपत्य रविं मूर्ध्ना वराहमिहिरात्मजेन पृथुयशसा ।
प्रश्ने कृतार्थगहना परार्थमुद्दिश्य सद्यशसा ॥

च्युविर्विलग्नाद्धिबुकाच्च वृद्धि-
र्मध्यात् प्रवासोऽस्तमयान्निवृत्तिः ।
वाच्यं ग्रहैः प्रश्न ... ... ....
. . . . . . . . . . हिबुके प्रवासी ॥

End

अंशकाज्ज्ञायते द्रव्य द्रेक्काणैस्तस्कराः स्मृताः ।
राशिभ्यः कालदिग्देशा वयोजातिश्च लग्नपात् ॥

Colophon :

इति षट्पञ्चाशिकाहोरायां सप्तमोऽध्यायः ।


Author—Pṛthuyaśas, son of Varāhamihirācārya. Vide p. 200 CSM., British Museum.

Remarks—The Ms. is printed in Bombay. The following verses on *Gocaraphala* etc., bring it to a close.

स्थानं जन्मनि नाशयेद् दिनकरः कुर्याद् द्वितीये भयं
दुश्चिक्ये श्रियमाकृणोति हिबुके मानक्षयं गच्छति ।
दैन्य पञ्चमगः करोति . . . . छेऽध्वगः सप्तमे
पीडामष्टमगः करोति पुरुषः क्षान्तिक्षयं धर्मगः ॥
कर्मसिद्धिजनितस्तु कर्मगो
वित्तलाभकृदथायसंस्थितः ।
द्रव्यनाशजनित महाभयं
यच्छति व्ययगतो दिवाकरः ॥
जन्मन्यन्नं दिशति हिमगुर्वित्तनाशं द्वितीये
दद्याद् द्रव्यं सहजभवने कुक्षिरोगं चतुर्थे ।
कायभ्रंशं तनयगृहगो वित्तलाभं च षष्ठे
द्यूने द्रव्यं युवतिमहित मृत्युसंस्थोऽपमृत्युम् ॥
नृपभय कुरुते नवमे शशी
दशमधामगतस्तु महत् . . . ।
विविधमायगतः कुरुते धनं
व्ययगतस्तु रुजं मधनक्षयम् ॥
प्रथमगृहगः क्षोणीसूनुः करोत्यरिजं भयं
क्षपयति धनं वित्तस्थाने तृतीयगतोऽर्थदः ।
अतिभयं पातालेऽर्थ क्षीणयति पञ्चमे ?
रिपुगृहगनः कुर्याद्वित्तं शुभं मदनस्थितः ॥
जनयति निधनस्थः शत्रुबाधां धराजो
दिशति नवमसंस्थः कायपीडामतीव ।

शुचमपि दशमस्थो लाभगो भूमिलाभं
व्ययभवनगतोऽसौ व्याध्यनर्थार्थनाशम् ॥
बुधः प्रथमधामगो दिशति बन्धमर्थं धने
धनं रिपुभयान्वितः सहजगश्चतुर्थेऽर्थदः ।
अनिर्वृतिकरो भवेत् तनयगोऽरिगोऽन्नप्रदः
करोति मदनस्थितो बहुविधां शरीरापदम् ॥
अष्टमे शशिसुतो धनलब्धिं
धर्मगोऽतिमहतीं धनपीडाम् ।
कर्मगोऽसुखमुपान्त्यगतोऽसौ
द्वादशे भवति वित्तनाशकः ॥
अथ जन्मन्यार्यो जनयति धनस्थेऽर्थमचलं
तृतीयेऽङ्गक्लेशं दिशति च चतुर्थेऽर्थविलयम् ।
सुखं पुत्रस्थाने शुचमपि च कुर्यादरिगृहे
द्यूने भूभृत्पूजां धननिचयनाशं च निधने ॥
धर्मगतो धनवृद्धिकरः स्यात्
प्रीतिकरो दशमे सुरपूज्यः ।
स्थानधनानि ददाति स चाये
द्वादशगस्तनुमानसपीडाम् ॥
जन्मन्यरिक्षयकरो भृगुजोऽर्थदोऽर्थे
दुश्चिक्यगः सुखकरो धनभं चतुर्थे ।
स्यात् पुत्रदस्तनयगोऽरिगतोऽरिवृद्ध्यै
शोकप्रदो मदनगो निधनेऽर्थदाता ॥
जनयति विविधाम्बराणि धर्मे
नसुखकरो दशमास्थितस्तु शुक्रः ।

धननिचयकरः स लाभगंस्थो
व्ययभवनेऽपि धनागमं करोति ॥
वित्तभ्रंशं विधत्ते दिनकरतनये जन्मराशिं प्रपन्ने
चित्तक्लेशं द्वितीये धनहरणकृतं वित्तलाभ तृतीये ।
पाताळे शत्रुवृद्धिं सुतभवनगतो भृत्यनाशार्थहानिं
षष्ठस्थानेऽर्थलाभं जनयति मदने दोषसंघातमार्किः ॥
शरीरपीडां निधनेऽथ धर्मे
धनक्षयं कर्मणि दौर्मनस्यम् ।
उपान्त्यगो वित्तमनर्थमन्त्ये
शनिर्ददातीत्यवदत् सुवृत्तः ॥
इति गोचरफलम् ।
शककुलशङ्कुशताण्डं नादपट्टूरूनशकाब्दसंगुणितम् ।
शंभुजयो चर .. ...तापरिधमुरैर्योजितं महन्छुक्रात्? ॥
तत्परपूर्वं शुद्धदिनम् ।



## ॥ संग्रामविजयोदयः ॥

## 967 SANGRĀMAVIJAYODAYA

Substance—Palm leaf Size—19½" × 1½". Leaves—147 7 lines per page and 32—36 letters per line. Script—Malayālam No. of Granthas—2250. Incomplete.

Subject—Prognostication of success in battle from the position of planets.

Author.

Remarks—The Ms. consists of 23 chapters. It is printed as No. 123 in TSS.

---

## ॥ सन्तानदीपिका ॥

## 968 SANTĀNADĪPIKĀ.

Substance—Palm leaf Size—18″ × 1¾″ Leaves—5 8 lines per page and 65 letters per line. Script—Malayālam No of Granthas—175

Subject—Exposition of the beneficent or baleful astrological indications for progeniture

Beginning·

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

गुरुनाथं नमस्कृत्य गणनाथं प्रणम्य च ।
वाग्देवीवन्दनं कृत्वा स्मृत्वा तं कमलोद्भवम् ॥
शङ्करं विष्णुमभ्यर्च्य संपूज्य च नवग्रहान् ।
वासुदेव गुरुं ध्यात्वा वक्ष्ये सन्तानदीपिकाम् ॥
वराहहोरामालोक्य तथा जातकपद्धतिम् ।
सारावलिं ततो दृष्ट्वा पराशरमतं तथा ॥
प्रश्नशास्त्राणि चान्यानि समालोच्य मुहुर्मुहुः ।
ततः सार समुद्धृत्य वक्ष्ये सन्तानदीपिकाम् ॥
अज्ञानामल्पबुद्धीनां हितार्थं वक्ष्यते मया ।
सन्तानदीपिकाशास्त्रमुपदेशार्थदर्शनम् ॥

End·

निधनेशे लाभगते षष्ठेशे वा व्ययेश्वरे वापि ।
शुभखेचरैरदृष्टे लाभविनाशं वदेन्मतिमान् ॥

लाभेशे परमोच्चस्थे शुभमध्यगतेऽथवा ।
लाभे सौम्यग्रहैर्दृष्टे बहुलाभं वदेद् बुधः ॥
व्ययेशे रन्ध्रगे षष्ठे रन्ध्रेशे व्ययसंस्थिते ।
धनधान्यसमृद्धिं च प्रवदेन्मतिमान्नरः ॥

Colophon

सन्तानदीपिकाशास्त्रमेकविंशोत्तरैः शतैः ।
हृद्यैः पद्यैश्च यत् प्रोक्तं सज्जनैः परिगृह्यताम् ॥
सन्तानदीपिका समाप्ता । शुभमस्तु ।

Author

Remarks—The Ms is a symposium of many astrological treatises Three works with the same title and theme are attributed to Keśava Mahādeva and Harināthācārya, on p 693, CC Vol I In Ms. No 505 (CSM. British Museum), another Śantānadīpikā is noticed containing 108 verses

---

## ॥ सर्वसिद्धिः ॥

### 969 SARVASIDDHI

Substance—Palm leaf Size—16″ × 1¾″ Leaves—17 10 lines per page and 48 letters per line Script—Malayālam. No of Granthas—500

Subject—Auspicious time for the discharge of each religious function.

Beginning .

... ... ... ... ... ... ... ...

. . . . यैवारुणे श्रोणावसुद्विचित्रा द्विमूलेन्द्व-

न्त्याशिरुन्धनुः कूपाद्विपक्रमे ... ... ...

... ... स्थिरराशौ निबध्यताम् ॥

मूलोत्तरार्कपश्वेन्दुरुद्रानन्दाजयान्विते ।

शुभवारेऽस्तगे शुक्रे क्षिप्ता नागी(?) न नश्यति ॥

क्षौरक्रियो ... ... ... ...

... .. ... शुभा विवाहे ।

वैश्यक्रियासु त्रिशुभाः शुचमष्टमस्थाः

कुर्वन्ति कर्मसु शुभान्वितरेषु सर्वे ॥

End

. . . ष्टोपवासाद्यौ विष्टिर्मात्रार्चनं ततः ।

पवित्रारोहतिथिपौ मास एकांशको विधिः ॥

महांशकादिचाराश्च क्रि ... ... कृतः ।

सारोद्धारो घटीसंज्ञा लक्षणं भद्रहांशकैः ॥

उक्तान्यत्र त्रयोविंशद्वस्तून्येव चतुर्थके ।

अध्यायोक्तवस्तूनि ।

Colophon

इति सर्वसिद्धौ चतुर्थोऽध्यायः समाप्तः ।

Author

Remarks—The Ms furnishes all details regarding Praśna, Jātaka and Muhūrta. The first six leaves are missing.



## ॥ सामुद्रिकलक्षणम् (केरलभाषाव्याख्योपेतम्) ॥

## 970 A. SĀMUDRIKALAKṢANAM

with Malayālam commentary

Substance—Palm leaf. Size—4″×1¾″ Leaves—34 10 lines per page and 12 letters per line. Script—Malayālam No of Granthas—250 Complete

Subject—Palmistry

Beginning:

हरिः । श्रीगणपतये नमः ।

आदावायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।

अल्पायुषां मनुष्याणां लक्षणैः किं प्रयोजनम् ॥

മുമ്പിൽ ആയുസ്സുലക്ഷണമറിക. ആയുസ്സില്ലെങ്കിൽ മററുള്ള ലക്ഷണം നോക്കേണ്ട

अष्टाधिकशतं चैव नवतीपरिमामृतम् ? ।

उत्तमः समहीनानां जायते पुरुषाकृतिः ॥

കാലിൻെറ പെരുവിരലിങ്കൽ നിന്നു് നിറുകയിലോളം ചരട്ട പിടിച്ചാൽ അതു് എത്രവിരലുണ്ടെന്നു് അവൻെറ വിരൽകൊണ്ടു് അളന്നാൽ നൂററെട്ടു വിരലുണ്ടെങ്കിൽ ദീർഘായുസ്സാം.

End

चलनमुपवास च स्नानं भुक्तं परिश्रमम् ।

स्त्रीसंगमे वचनाभ्यासी अपस्मारी भ्रमात्मकः ॥ (?)

स्थूलदेशी च सर्पाणां दष्टको नाडिनाशनम् ।

ഇങ്ങനെ ഇരിക്കുന്നവർക്കു് നാഡികൾ അറിഞ്ഞുകൂടാ.

Colophon

सामुद्रिकं समाप्तम् ।

Author

Remarks—The Ms succinctly deals with all the salient features in plamistry

---

## ॥ आयुधलक्षणम् (केरलभाषा) ॥

## 970 B. ĀYUDHALAKṢAṆAM

Substance—Palm leaf Size—4″ × 1¾″ Leaves—15. 10 lines per page and 12 letters per line Script —Malayālam No. of Granthas—110

Subject—Enumeration of different kinds of weapons used in battle.

Beginning

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ഗുരുപാദത്തെ വന്ദിച്ചു് കുറയെക്കൊണ്ടുഭാഷയായ്
അറിവാനിഹ ചൊല്ലുന്നേനഹമായുധലക്ഷണം.
പ്രഥമം വന്നുകാണുമ്പോൾ ഉള്ള ഭൂതോദയം വഴേദൽ
ബുധനും വ്യാഴവും വെള്ളി തിങ്കളിച്ചൊന്നാവാരവും
പ്രഥമപക്ഷവും കൂടിട്ടൊരുമിച്ചുവരുന്നനാൾ
ഇടമേ ദേവനാകുംപോൾ വരും പുത്രകശോഭനം
ശനിയും ഞായറും ചൊവ്വ വരവു് കൃഷ്ണപക്ഷവും
വലമേ ദേവനാകുംപോൾ വന്നറീലത്തുമാം പുനഃ

End

തന്റെ ദേഹം മുറിച്ചീട്ടും വാൾഗണ്ഡാന്തമുണ്ടാകിൽ
വേദിയൻ വംശമാകിൽവാൾ പേടിയാം രണഭൂമിയിൽ.

വർണ്ണഭേദം തിരിച്ചിട്ടു കണ്ടുകൊൾക ഫലപ്രദം
ഏത്രയും പൊരുളൊണ്ടാക്കും ക്ഷത്രിയൻ വംശമാകിൽ വാൾ
യുദ്ധവും പൊരികെത്തൊന്നും വെട്ടുവാൻ പണിവെണം
യുദ്ധസാഹസനല്ലോട്ടും വൈശ്യൻ്റ ശമാകിൽ വാൾ
ശൂദ്രനാകിൽ വഴക്കുംകൽ ക്ഷത്രിയൻ ജിതവൈരിണഃ
[illegible] സർവ്വം വാഴ്ത്തുന്നോൻ വാൾക്ക ലക്ഷണം

Colophon

इति तृतीयोऽध्यायः ।

Author

Remarks—The Ms comprises three chapters The following occurs immediately after the colophon

" ദൂതൻ ചൊന്ന എഴുത്തെണ്ണി ഒമ്പതിൽ പെരുക്കി പ
ന്ത്രണ്ടിൽ ഹരിച്ചാൽ മേടമാദിയായ രാശി വരുന്നതു് "

in addition to a *mantra*, on poison-cure



## ॥ सामुद्रिकलक्षणम् ॥

### 971 A SĀMUDRIKALAKSANAM

Substance—Palm leaf Size—$8\frac{1}{2}'' \times 1\frac{3}{4}''$ Leaves—8 8 lines per page and 25 letters per line Script—Malayālam No of Granthas—100

Subject—Same as No 970 A

Beginning.

आदिदेव प्रवक्ष्यामि सर्वज्ञं सर्वदर्शनम् ॥ ?

पूर्वमायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
आयुर्हीननराणां तु लक्षणैः किं प्रयोजनम् ॥
जघन्य नवति(?)प्रो(क्ष्म?क्त) मध्यमं तु शताङ्गुलम् ।
अष्टोत्तरशतं यस्य रूपमुत्तमलक्षणम् ॥
पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ।
सप्तरक्तं त्रिगम्भीरं त्रिविस्तीर्णं प्रशस्यते ॥

End

पादौ सगुल्फप्रथमप्रदिष्टौ जङ्घे द्वितीय च सजानुचक्रे ।
मेढ्रोरुमुष्कं च ततस्तृतीय नाभिः कटिश्चेति चतुर्थमाहुः ॥
उदरं कथयन्ति पञ्चम हृदयं षष्ठमथ स्तनान्वितम् ।
अथ सप्तममंसजत्रुणी कथयन्त्यष्टममोष्ठकन्धरम् ॥
नवमं नयने च सभ्रुणी सललाटं दशम शिरस्तथा ।
अशुभेष्वशुभं दशाफलं चरणार्द्येषु शुभेषु शोभनम् ॥

Colophon

इति भोग्यस्त्रीलक्षण समाप्तम् ।
... . एतस्मिन् स्वर्णा दुर्वर्णा ये मया कृताः ।
स्वर्णानेव हि तान् कर्तु सज्जनेभ्यो नमो नमः ॥

शुभमस्तु ।

Author :

Remarks-- The Ms contains the text and its commentary in Malayālam and the latter has been catalogued separately.

## ॥ सामुद्रिकलक्षणम् (केरलभाषा) ॥

## 971 B SĀMUDRIKALAKṢAṆAM.

(Malayālam)

Substance—Palm leaf Size—$8\frac{1}{2}'' \times 1\frac{3}{4}''$ Leaves—15
8 lines per page and 25 letters per line Script
—Malayālam No of Granthas—200

Subject—Same as No. 970 A

Beginning

आदावायुः परीक्षेत पश्चाल्लक्षणमादिशेत् ।
क्षीणायुषां नराणां तु लक्षणैः किं प्रयोजनम् ॥

മുമ്പിൽ ആയുസ്സിനെ പരീക്ഷിക്കണം പിന്നെ ലക്ഷണത്തെ ചൊല്ലണം ആയുസ്സില്ലെങ്കിൽ അവക്കു് മററുള്ള ലക്ഷണംകൊണ്ടു ഫലമെന്തു് ॥

End

പ്രഥമയ്ക്കു പെരുവിരലും മേൽനില്ക്കും ദ്വിതീയയ്ക്കു പുറവടിയിൽനില്ക്കും തൃതീയയ്ക്കു കതിനരമ്പിൽനില്ക്കും ചതുൎത്ഥിക്ക മുഴക്കാലിൽനില്ക്കും പഞ്ചമിക്ക യോനിയിൽനില്ക്കും. ഷഷ്ഠിക്ക നാഭിയിൽനില്ക്കും സപ്തമിക്ക നെഞ്ചിൽനില്ക്കും അഷ്ടമിക്ക മുലയിൽനില്ക്കും നവമിക്ക കക്ഷത്തിൽനില്ക്കും ദശമിക്ക കഴുത്തിൽനില്ക്കും ഏകാദശിക്ക കവിൾത്തടത്തു്, ദ്വാദശിക്കു് അധരത്തിൽ, ത്രയോദശിക്ക കണ്ണിൽ ചതുൎദ്ദശിക്ക നെററിമേൽ, പൌൎണ്ണമാസിക്ക ശിരസ്സിൽ അപരപക്ഷത്തിലെങ്കിൽ വലത്തു പുറത്തു മൂൎദ്ധാവുംകൽനിന്നു് ഇതിക്രമേണ മൂലത്തിങ്കലോളം

कुर्वन्ति स्मरमन्दिरे करिकरक्रीडां स्त्रियो जानुनी
गुल्फाङ्गुष्ठपदानिलः प्रतिदिनं जघ्नन्ति नेरात्मना । ?

कक्षौ कण्ठतले लिखन्ति नखरैर्गृह्णन्ति गाढस्तनं
मुष्ट्या वक्षसि ताडयन्ति दधतो नाभौ च पादं शनैः ॥

सामवश्याश्च पद्मिन्यो दानवश्या च चित्रिणी ।
भेदवश्याश्च शंखिन्यो दण्डवश्या च नागिनी ॥
पूर्वरात्रे तु चित्रिण्याः शखिन्यास्तदनन्तरम् ।
अर्द्धरात्रे तु नागिन्याः पद्मिन्याः सर्वदा गतिः ॥
सरमस(री?रमी) च पद्मिन्यां विरमसरमी च नागिनी ।
सरमविरमी च शखिन्यां.... .... ॥
पद्मिन्यां तु षडङ्गुल्यं शंखिन्यां तु दशाङ्गुलम् ।
विशालं तु त्रयाङ्गुल्यं चित्रिणी चाष्टमाङ्गुलम् ॥
विशाल पञ्चमाङ्गुल्य नागिन्या द्वादशाङ्गुलम् ।
विशालन्तु षड्गुलम् . .. ॥
शय्यागेहमुपागतः सहवसन् दत्त्वा पुरो वीटिकां
आइल मधुरा (?) विनोद्य सुमुखीमङ्गं करेणामृशन् ।
आजिघ्रन् परिरभ्य गाढमधरं पीत्वा.......
... . .. . ॥

Colophon

Author

Remarks—The Ms is old

## ॥ सारावली ॥

## 972 SĀRĀVALĪ

Substance—Palm leaf. Size—18″ × 1¾″ Leaves—81,

9 lines per page and 72 letters per line Script—Malayālam. No of Granthas—3250

Subject—*Jātakaphala.*

Beginning

श्रीगणपतये नमः । अविघ्नमस्तु ।

यस्योदये जगदिदं प्रतिबोधमेति
मध्यस्थिते प्रसरति प्रकृतिक्रियासु ।
अस्त गते स्वपिति चोच्छ्वमितैकमात्रं
भानुः स एष जयति प्रकटप्रभावः ॥

End

शुककाकान्यपुष्टाश्वकोरभासाश्च जायन्ते ।
सिंहोदये तथांशे सूक्ष्मांशे रविनिरीक्षिते सूतिः ॥
कुक्कुटमयूरतित्तिरिपारावतवञ्जुलादीनाम् ।
पौरगृहसंयुक्तैर्दृष्टैर्वा ग्रामनगरखेटानाम् ॥
प्रासादगृहादीनामुत्पत्तिः पूर्ववज्ज्ञेया ।

Colophon

इति सारावल्यां कल्याणवर्मविरचितायां वियोनिजन्माध्यायस्त्रिपञ्चाशः ।

इति सारावली समाप्ता । श्रीसूर्यादिसर्वग्रहेभ्यो नमः ।
श्रीगुरुभ्यो नमः ।

Author—Kalyāna Varman (Vide p 182 CSMBM )
His date is about 578 A D

Remarks—The Ms is available in print.



## ॥ सारावली ॥

### 973 SĀRĀVALĪ

Substance—Palm leaf Size—12″ × 1½″ Leaves—30 10 lines per page and 40 letters per line. Script—Malayālam No of Granthas—1000.

Subject—Same as No. 972

Beginning

....म्रोति गते शीघ्रम् ।
स्त्रीणां चन्द्रामितौ नपुंसक......... ॥

End

उत्सवसमाजशीलो गोमहिषाजखरवारणोपेतः ।
रविसुतदृष्टे जीवति भाग्यस्थे स्याद्विनीतश्च ॥

Colophon

केन्द्रश्चन्तरयोगाध्याय एकत्रिंशः ।

Author—Same as No 972

Remarks—The Ms contains chapters 4, 7, 20, 31 and a fragment of 32.

---

## ॥ सारावली ॥

### 974 SĀRĀVALĪ

Substance—Palm leaf Size—10″ 1¾″ Leaves—74. 7—8 lines per page and 24 letters per line Script—Malayālam No. of Granthas—900,

Subject, Beginning—Same as No. 972

End

स्वक्षात् केन्द्रेषु यातैर्गुरुबुधभृगुजैर्मन्दभान्वारयुक्तैः
स्वोच्चश्चन्द्रोऽपि तिष्ठन् जनयति नृपतिं कीर्त्तिशुक्लीकृताशम् ।
अत्युच्च लग्नसंस्थो रविरपि भगवान् पार्थिवं क्रूरचेष्टं
यातायातैः समस्ताश्चतुरुदधिजलं यस्य सेना . . . . न्ति ॥
उदयचरनवांशके सुखस्थः कमल . . .पुस्तकल . . . . .

Colophon

इति नाभसयोगाध्याय एकविंशतिः ।

Author—Same as No 972

Remarks—The Ms covers 21 chapters Almost all the leaves are worm-eaten A portion of the 22nd chapter is also seen here

---

## ॥ सिद्धान्तदर्पणव्याख्या ॥

## 975 SIDDHĀNTADARPAṆAVYĀKHYĀ

Substance—Palm leaf Size—21″ 1¼″ Leaves—46 7 lines per page and 64 letters per line Script—Malayālam No of Granthas—1300 Incomplete

Subject—*Gaṇita*

Beginning

... ... स्माद् ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयः । तदर्थश्च ज्ञातव्य इति । तस्माद् ब्राह्मणेन विहिता-

ननुष्ठाननिमित्तात् प्रत्यवायाद् बिभ्यताऽवश्यमध्येयानि ... ... शीक्षादिनि षडङ्गानीति सिद्धम् । अथ चतुर्भिः श्लोकैः सूर्यादीनां कल्पपर्यायाः प्रदर्श्यन्ते ।

End

अतस्तत्साधनभूतभुजाकोटिग ... ... लिप्ताभिर्भवितव्यम् । एते पुनः शङ्कुच्छाये भूगोळेऽसामस्हादिमके । (अ)तः छायाया भुजात्वमनुपपन्नम् । यद्यपि स्फुटकर्णगता लिप्ता भगोळलिप्ताः, तथापि शंकुगत ... ... ...

Colophon

Author

Remarks—The opening leaf is missing The Ms is old and decayed The identity of the author is not clear but he himself states that he was the *Praśisya* of Paramesvara, the author of Siddhāntadīpikā

"श्रीमदामोदराह्वयाद् गुरुमुखागतेन श्लोकेनोक्तम्" तत्रास्मत्परमगुरुः परमेश्वराचार्यो भार्गवोऽश्वत्थग्रामजो मुन्यंशमम्सांशो वा पञ्चमांशो वेति संशय्य बहुपरागदर्शनेन पञ्चांशान्तत्वं निर्णीय सिद्धान्तदीपिकायां गोविन्दभाष्यव्याख्यायामवदच्च" ।

Śankaranārāyana, the commentator on *Mahabhāshariya* is referred to in this work Some leaves are written on a single side only

## ॥ सिद्धान्तदीपिका ॥

### 976. SIDDHĀNTADĪPIKĀ.

Substance—Palm leaf Size—21″ × 1½″ Leaves—52 10 lines per page and 88 letters per line. Script—Malayālam No of Granthas—2850

Subject—Same as No 870

Beginning

............. . .. छेदेन हि हारराशिर्निहन्यते । अत इच्छाफलच्छेदाभ्यां द्वाभ्यामपि प्रमाणराशिर्निहन्तव्यः । छेदा इति । छेदस्यैतच्छेदेन हननविधानादंशस्यापि तद्धननमभिहितं भवति । गुणस्य छेदो हि हारात्मकः । हारस्य छेदो गुणात्मकश्च । अतो गुणकारस्य छेदो भागहारगुणितस्फुटो भागहारो भवति । भागहारस्य छेदो गुणकारगुणितस्फुटो गुणकारो भवति ।

End.

भास्करेणेत्यादिनोपसंहरति । आचार्यार्यभट इत्यनेन भाष्यमुपसंहरति । तेनाकरोदिति । भास्कराचार्यो महाभास्करीयाख्येन तन्त्रेण आर्यभटतन्त्रस्य वृत्तिमकरोदित्यर्थः । गुरुमुखादिति । गुरुमुखादर्थं विज्ञाय इत्यर्थः । अथवा लिखिता श्रुता गुरुमुखादिति पाठः ।

Colophon:

आचार्यार्यभटोऽकरोद्विधिमत तन्त्रं पुनर्भास्करो
वृत्तिं तस्य च विस्तरात् पुनरथो भाष्यं च तस्यास्तथा ।

गोविन्दोऽस्य च दूरमेत्य सुधियामर्थस्त्विदानीमिति
व्याख्या तस्य मया कृता लघुतरा रुद्रप्रसादादिति ॥
निळाब्ध्योः सङ्गमात् सौम्ये भागे योजनसम्मिते ।
ग्राममध्ये प्रसारण्ये वसन् विष्णुः प्रसीदतु ॥
परमेश्वररचितायां व्याख्यायां भास्करीयभाष्यस्य ।
सिद्धान्तदीपिकायामासीत् पूर्णोऽष्टमोऽध्यायः ॥
श्रीमच्छङ्करपादपङ्कजरजःपुञ्जप्रभापिञ्जर-
ग्रीवालम्बिशिरोरुहो वसुमतीगीर्वाणवृन्दारकः ।
भारद्वाजमहान्ववायतिलकश्रीदेवयानात्मजो
गोळप्रेक्षणदर्पणं लिखितवानेत .. ... ॥
... ..नात्रयः . .. ...
चापलान्मातृकापत्रिकाशस्त्रजादीनवाक् ।
यो लिपेरस्फुटत्वादिदोषोऽत्र सन्त्यज्यता
माशु सुज्योतिषज्ञैर्जनैः ॥
तारकसुताशनविनाशनमहारः-
पीठपत... .. ...
... ...तुना भुवनमण्डनकुमार-
कोटनिलयो निलसुतो गिरिवरारिः ॥ (?)

Author—Paramesvara, disciple of Rudra (Vide p 70. CC Part III)

Remarks—The opening leaf is missing. The work is a commentary on *Mahābhaskarıyabhāsya.* The verse beginning with "श्रीमच्छङ्कर—discloses that it was transcribed by Śrı Śankarācārya's Brahmin disciple, son of Devayāna belonging to Bhāradvājagotra It seems to be an interpolation

---

## ॥ सुन्दरी (लघुभास्करीयविवृतिः) ॥

### 977. SUNDARĪ.

Commentary on Laghubhāskarīya.

Substance—Palm leaf Size—15″ × 1½″ Leaves—143. 9 lines per page and 56 letters per line Script—Malayalam No of Granthas—4400 Incomplete

Subject—Same as No. 870

Beginning—Same as No 943

End

एवमन्याभ्यामप्येककालशङ्कुः स्वाहोरात्रेष्टज्याभ्यां शङ्कुरानीयते इति । तत्कालमध्या.. ... ...कानयनायाहरपि कक्ष्यामध्यज्यात्रिज्यातु.. . .... .... त्योर्विशेष्य शेषपदं तत्कालमध्यजातो गोळ.... . .... यनवक्ष्यति । तत्र मध्यज्या दक्षिणोत्तरायता भुजा लम्बकश्चात ऊर्ध्वायता कोटिः तत्कर्ण... ... ... ... ... ... .

Colophon

इति ज्योतिषभट्टश्रीमदुदय (दिवाकर) विरचितायां लघुभास्करीयविवृतौ ग्रहोदयास्तमयाध्यायः षष्ठः । ... ...

Author—Same as No 942

Remarks—The leaves have begun to decay The first 58 leaves and the 99th contain the com-

mentary on Laghubhāskarīya and 59—98, Govindasvāmin's Bhāsya on Mahābhāskarīya. The chapters are not arranged in order

—

## ॥ सूर्यसिद्धान्ततन्त्रप्रदीपः ॥

978. SŪRYASIDDHĀNTATANTRAPRADĪPA.

Substance—Palm leaf. Size—13″ 2″ Leaves—9 9 lines per page and 32 letters per line. Script—Malayālam. No of Granthas—170

Subject—Astronomy.

Beginning

प्रणम्य भास्करं . . . सिद्धान्ततन्त्रकम् ।
संक्षिप्य योगिना तन्त्रप्रदीपाख्यं प्रवक्ष्यते ॥
युगे शुक्रार्कविणमध्यखचतुष्करमार्णवाः ।
भगणा भौमजीवार्किशीघ्राश्चैतेऽर्कवत्मगाः ॥

End

मध्यशीघ्रान्तरं यत्तु द्वकावृत्यु ... स्तकम् ।
ससन्निलयनेत्रश्रीपाथेयन्नदमागरः ॥
भास्करान्यन्दतुङ्गांशा कल्याथा ... ।
.. ... .. .. ॥

Colophon

इति तन्त्रप्रदीपे सप्तमोऽध्यायः ।

Author—Yogi.

Remarks—The Ms. is much damaged It breaks off on the 8th chapter

———

## ॥ स्कान्दशारीरकम् ॥

## 979. SKĀNDAŚĀRĪRAKAM.

Substance—Palm leaf. Size—14″ × 2″ Leaves—138. 8 lines per page and 60 letters per line Script—Malayālam No. of Granthas—4150

Subject—Physiognomy

Beginning.

इदमन्धं तमो हि . . . . . भासतेतराम् ।
नमोऽस्तु तस्मै सूर्याय जगज्जन्मादिहेतवे ॥ इति ॥

अनेन सर्वकारणत्वं ...... शकत्वाच्च सूर्यनमस्कारः क्रियते । परिसमाप्त्यादिफलं भविष्यति। सूर्यस्य च परमात्मत्व श्रुतिसिद्धम्।

End:

. . . . . त्रिधात्रा सास्माभिर्भृशं लक्षणादिकथनेन विचारणे च सा कथिता इति शिवम् ।

छन्दोभङ्गो लिङ्गभेदः समानस्यापि संयतिः ।
तत्र प्रकरणाद् ज्ञेयो दोषः केनापि हेतुना ॥
सा व्याख्यातुः क्वचित् कश्चिदिति हेतुः स्वयं स्थिरः ।
अन्योऽपि हेतुरत्रास्ति लक्षणानां निरोधनम् ।
वैचित्र्यं फलमत्रापि यदुक्तं लक्षणैर्न तत् ।
निरूप्य वस्तुसर्वस्वं यत् स्फुरेत् तद्वदेदिह ॥
प्रमाणं वृत्तिरेवात्र न प्रत्यक्षादिसंभवः ।
आचारादेव संसिद्ध्येत् तस्मात् तस्मै नमो नमः ॥

Colophon

इति स्कान्दशारीरके प्रेक्ष्यादिवर्णनं नाम अष्टमोऽध्यायः ।

Author:

Remarks—The work includes palmistry, Ārūdha etc. It is being published in TSS. as No. 137. Short notes in Malayālam are attempted in the course of the Ms The exquisite commentary appended to the Ms renders its comprehension easy That the work is unique in its kind is made manifest by its solitariness in the world of letters and by remarkable variants especially in the concluding stanzas

---

## ॥ स्कान्दशारीरकम् ॥

## 980 SKĀNDAŚĀRĪRAKAM

Substance—Palm leaf Size—19″ × 2″ Leaves—98. 8 lines per page and 72 letters per line Script—Malayālam. No of Granthas—3500 Complete

Subject etc.—Same as No 979.

## ॥ स्त्रीपुरुषलक्षणम् ॥

## 981 STRĪPURUSALAKSANAM

Substance—Palm leaf Size—17″ 2″ Leaves—8. 11—12 lines per page and 40 letters per line Script—Malayālam. No. of Granthas—200, Incomplete.

Subject — Prognostication based on physical features

Beginning :

... ...पञ्चस्त्रनावृताः ।
अविच्छिन्ना त्रिवर्णाश्चेच्छतमायुर्विनिर्दिशेत् ॥
ललाटे यस्य दृश्यन्ते चतूरेखास्त्वनावृताः ।
अविच्छिन्ना (त्रि)वर्णाश्चेदशीत्यायुर्विनिर्दिशेत ॥
ललाटे दृश्यते यस्य वलित्रयमनावृतम् ।
षष्टिवर्षं विनिर्दिष्टं नारदस्य वचो यथा ॥
ललाटे दृश्यते यस्य रेखाद्वयमनावृतम् ।
अविच्छिन्ना विवर्णा चेद्विंशत्यायुर्विनिर्दिशेत् ॥

End

......क्षयं वित्तविनाशसौख्य
दुःखार्थहानिं सुखनाशमृत्युम् ।
हरन्ति लाभ सुशुभ व्ययं च
कुर्यात्तमो... ... ... ॥

भ्रातृदशषष्ठमृतिपुत्रतनुलाभे-
ष्वर्कशशिभौमबुधजीवमितमन्दाः ।
परिधिरथ नवांशे लिङ्गतुङ्गे च भूयः ।
त्रिभिरपि गुणभागैः सुत्रिभिस्तुङ्गमानं
ह्यजहतहरभाग यत्तु त्रैराशिक स्यात् ॥

Colophon ·

शिवलिङ्गलक्षणम् ।

Author—Same as No. 1123.

Remarks—The Ms. comes to an end with a fragment of the 7th chapter.

॥ मुकुन्दयजनक्रमदीपिका ॥

1125. MUKUNDAYAJANAKRAMADĪPIKĀ.

Substance—Palm leaf. Size—9″ × 2½″. Leaves—58. 9—11 lines per page and 30 letters per line. Script—Malayālam. No of Granthas—1000.

Subject—Same as No 1116

Beginning:

कलाक्त?मायालवकात्तमूर्त्तिः कळक्कणद्वेणुनिनादरम्यः ।
...... दिव्याकुलयंस्त्रिलोकीं श्रियेऽस्तु गोपीजनवल्लभो वः ॥

गुरुचरणसरोरुहद्वयोत्थान्
महितरजःकणकान् प्रणम्य मूर्भा ।
गदितमिह विविच्य नारदाद्यै-
र्यजनविधिं कथयामि शार्ङ्गपाणेः ॥

क्षितिसुरनृपविट्तुरीयजानां
मुनिवनवासिगृहस्थवर्णिनां च ।
जपहुतयजनादिभिर्मनूनां
फलति हि कश्चन कस्यचित् कथञ्चित् ॥

End:

यावन्मनो विलयमेति हरेरुदारं
मन्दस्मिते ह्यस्तुतावदनंगलीन्दुम्? ।

अष्टादशार्णमथवा दशवर्णकं वा
मन्त्रं शनैरथ ममायतमातरिश्वा ॥

आरोप्यारोप्य मन्त्रं पदारविन्दादिमन्दहसितान्तम् (?) ।
तत्र विलोप्य क्षीणे चेतसि सुखचित्सदानन्दकेकागानाम् (?) ॥
दीपिकयोद्भावयवोद्भाव्यते कर्म कृष्णमन्त्रगणकलितानाम् ।
संशयतिमिरच्छिदुरा सैषा क्रमदीपिकाकरणे ॥

महद्भिः क्रमदीपि ... ... स्नेहमहर्निशम ।
समस्तसुखाप्त्यै ... . ... ... ... ॥

Colophon :

इति श्रीमत्क्रमदीपिकायां सप्तमः पटलः ।

Author

Remarks—The Ms contains the first seven *patalas* and a fragment of the 8th.

---

## ॥ मुकुन्दयजनक्रमदीपिका ॥

### 1126 A MUKUNDAYAJANAKRAMADĪPIKĀ

Substance—Palm leaf Size—9″ × 1½″. Leaves—115 5—6 lines per page and 26 letters per line. Script—Malayālam. No of Granthas—1020

Subject—Beginning—Same as No. 1116

End .

जनमिम(म)?नुविद्धा येन यस्मिन् प्रसूते
यदनु ततमजस्रं पाति चाभिष्ठितास्याम् ।

यद्गुरु मह उदर्चिर्य विधत्ते च गोषि ?
तममृतसुखबोधज्योतिषं नौमि कृष्णम् ॥

Colophon

इति श्रीक्रमदीपिकायामष्टमः पटलः । समाप्ता चेयं क्रमदीपिका । हरिः श्रीकृष्णाय नमः ।

Author .

Remarks—The Ms is fairly accurate.

---

॥ कृष्णमन्त्रध्यानविधिः ॥

1126 B KRSNAMANTRADHYĀNAVIDHI

Substance—Palm leaf. Size—9″ × 1½″ Leaves—11½ 5—7 lines per page and 25 letters per line Script—Malayālam No of Granthas—100.

Subject—Mantric meditation on Lord Krsna

Beginning .

श्रीमहागणपतये नमः ।

गुरुं गणपतिं देवं प्रणम्य भगवत्तमान् ।
सुध्यान कृष्णमन्त्रस्य संक्षिप्तं वक्तुमारभे ॥
सप्तप्रकृतिभिः सप्तसागरादिपरिष्कृते ।
या नातिवर्तितुं शक्या नरैर्भागवतोत्तमैः ॥
प्राकारैः सप्तभिस्तुङ्गैस्तदन्तरनिवेशिभिः ।
... ... ... ...राजद्भिः साङ्गवेदमयैरपि ॥
वेदवाक्यमयैर्द्वारैः श्रेयस्साधनगोचरैः ।

गोपुराद्यात्मसंस्थानवाक्यालङ्कारशोभितैः ॥

End

विभूतिवर्णने भक्त्या यज्जिह्वा चपलायते ।
एवमाश्चर्यविभवो द्वारकानिलयो हरिः ॥
सुषुम्नान्तस्समुद्योतं ज्योतिषां ज्योतिराकरम् ।
आप्याययन्निदं सर्वं व्याप्नुवन्न तमीयते ॥
हरिः श्रीकृष्णाय नमः ।

Author

Remarks—A portion relating to the glorification of Rsabhaksetra is set forth on a Fol at the close.

## ॥ रामरहस्यम् ॥

### 1127 A RĀMARAHASYAM

Substance—Palm leaf. Size—7″ × 1½″ Leaves—27. 7 lines per page and 24 letters per line. Script—Grantha. No of Granthas—275.

Subject—The modes of worshipping Srī Rāma.

Beginning :

विदार्भितं तु तत्प्रोक्तं दुष्टघ्नं वश्यरक्षणम् ।
मन्त्रेणान्तरित साध्यं समन्तात्तिष्ठते यदि ॥
आक्रान्त तद्विजानीयात् सद्यस्सर्वार्थसिद्धिदम् ।
स्तोभस्तम्भसमावेशवश्योच्चाटनकर्मसु ॥

सकृत्पूर्वं वदेन्मन्त्रमन्ते चैव तथा पुनः ।
मध्ये चास्य भवेत् साध्यमाद्यन्तमिति तद्विदुः ॥
अन्योन्यप्रीतियुक्तानां विद्वेषणकरं परम् ।
आदौ चान्ते तथा मन्त्रं द्विवारं संप्रयोजयेत् ॥

End

यः पृथ्वीभरवारणाय दिविजैः सम्प्रार्थितश्चिन्मयः
संजातः पृथिवीतले रघुकुले मायामनुष्योऽव्ययः ।
निश्शङ्कं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्य स्थिरां
कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे ॥

हरिः । शुभमस्तु ।

Author

Remarks—22 leaves are missing at the beginning. Only from the 23rd Fol. begin the *yantras* and the portion dealing with *Rāmarahasya* etc.

---

## ॥ हनुमत्स्तोत्रम् ॥

### 1127 B. HANUMATSTOTRAM.

Substance—Palm leaf Size—7″ × 1½″ Leaves—6. 6 lines per page and 17 letters per line Script —Grantha. No. of Granthas—32

Subject—A panegyric of Hanuman.

Beginning

हनूमन्मन्त्रस्य ईश्वर ऋषिः । अनुष्टुप्छन्दः । हनूमान् देवता । ओं बीजम् । स्वाहा शक्तिः । हनूमत्प्रीत्यर्थे इष्टकाम्यार्थसिद्ध्यर्थे जपे विनियोगः। ओं अञ्जनासुताय हृदयाय नमः । रुद्रमूर्तये शिरसे । वायुपुत्राय शिखा, अग्निगर्भाय क(व)च, रामप्रियाय नेत्रे, ब्रह्मास्त्रनिवारणाय अस्त्राय ।

(ध्यानम्)

श्रीरामस्यैकदूतः पवनतनुभवः पिङ्गलाक्षः शिखावान्
सीताशोकापहर्ता दशमुखविजयी लक्ष्मणप्राणदाता ।
आनेता भेषजाद्रेर्लवणजलनिधेर्लङ्घने वायुवेगो
वीरः श्रीमान् हनूमान् मम मनसि हितं कार्यसिद्धिं विदध्यात् ॥

ओं नमो भगवते हनूमते स्वाहा । पश्चाद्विनियोगमनु षडङ्गं पूर्वं ध्यानम्

ध्यायेद्बालदिवाकरद्युतिनिभं देवारिदर्पापहं
देवेन्द्रप्रमुखप्रशस्तयशसं देदीप्यमानं रुचा ।
सुग्रीवादिसमस्तवानरयुत सुव्यक्ततत्त्वप्रियं
संरक्ताननलोचन पवनजं पीताम्बरालङ्कृतम् ।

End

संसारसागरावर्तगर्तसंभ्रान्तचेतसाम् ।
शरणागतमर्त्यानां शरण्याय नमो नमः ॥
राजद्वारे बिलद्वारे ...वेशे भूतसकुले ।
गजसिंहमहाव्या ... ... ... नने ॥
शरण्यार्थी शरण्या च ... ... त ।
... ... प्रदोषे वा प्र ... तो वा ये ... ॥

... ... ... ... भम ।
...सिद्धिं यशः कीर्ति प्राप्नुवन्ति ... ... ॥
... प्रयाणे ... दिश तं नेषा ... ... ।
... ... ... .. तेजमे ॥
दुष्टदैत्यमहाद्... ... ... ...
... ब्रह्मास्त्रस्तम्भनाय नमः श्रीरुद्र ... ॥
... ... ... ...अपेन्नरः ।
राजद्वारे ... ... प्राप्नुवन्ति जय ध्रुवम् ॥
विभीषणकृतं स्तोत्रं यः पठेत् .... रः ।
सर्वापद्भ्यो विमुच्येत मुच्यते न विचारणा ॥

Colophon ·

इति विभीषणकृतं हनूमत्स्तोत्रं समाप्तम् ।

Author—Vibhisana

Remarks—Descriptions of the *Hanumat Mantra*, bulk largely in the Ms.

॥ हनुमद्यन्त्रम् ॥

1127 C HANUMADYANTRA

Substance—Palm leaf Size—7" × 1½" Leaves—5 7 lines per page and 21—23 letters per line. Script—Grantha No of Granthas—50

Subject—Yantra pertaining to Hanuman

Beginning .

अथ यन्त्रं प्रवक्ष्यामि इष्टकार्यार्थसिद्धये ।
... ...समालिख्य त्रिकोणं वर्तुळ भ... ।

...ळं पद्मं नतः पार्थिवमण्डलम् ।
तद्बाह्ये षोडशाब्जं स्याद् द्वात्रिंश......युतम् ॥
चतुष्षष्टिदलोपेत शोभनं वृत्तमुज्ज्वलम् ।
तद्बाह्येऽभ्रपुरद्वन्द्व वज्रकोणसमावृतम् ॥
मायाबीजं लिखेद्बिम्बे त्रिकोणेषु तथा लिखेत् ।
अष्टबीजान्समुच्चार्य वसुपत्रेषु लेखयेत् ॥
केयदष्टाक्षरीत्युक्त तत्र गोप्य शृणुष्व ह ।
वेदादि प्रथमो ज्ञेयो रामदूताय उद्धरेत् ।
. ... ..दष्टाक्षरदैवतम् ॥
... ... अस्य श्रीरामषडक्षरीमन्त्रस्य

End

नारद ऋषिः । गायत्री छन्दः । बालरामो देवता ।
रामभद्र महेष्वास रघुवीर नृपोत्तम ।
दशास्यान्तक मां रक्ष श्रिय मे देहि दापय ॥

मारुतपुत्रः श्रीहनुमान् ऋषिः अनुष्टुप्छन्दः सर्वापन्निवारणः श्रीरामो देवता ।

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीराम भूयो भूयो नमाम्यहम् ॥
ईश्वर ऋषिः । अनुष्टुप्छन्दः । सर्वापन्निवारणः श्रीरामो देवता ।
नमः कोदण्डहस्ताय सन्धीकृतशराय च ।
खण्डिताखिलदैत्याय रामायापन्निवारिणे ॥

Colophon :

Author

Remarks—The Ms. is much damaged. A few *Mantras* relating to Śrī Rāma and Sītā occur herein sporadically

## ॥ वास्तुविद्या ॥

### 1128 VĀSTUVIDYĀ.

Substance—Palm leaf. Size—$6\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—39. 7—8 lines per page and 22—28 letters per line. Script—Malayālam No of Granthas—450

Subject—Same as No 1115 B

Author .

Remarks—Chapters 1—12 have been published as No. 30 in TSS on the basis of this Ms.

---

## ॥ वास्तुविद्या (भाषातात्पर्योपेता) ॥

### 1129 VĀSTUVIDYĀ

Substance—Palm leaf. Size—$10\frac{1}{2}' \times 1\frac{3}{4}'$ Leaves—152. 6—8 lines per page and 29—32 letters per line. Script—Malayālam. No. of Granthas—1900.

Subject—Same as No. 1115 B

**Beginning:**

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

നത്വാ ഗുരൂൻ വിഘ്നരാജം വിശ്വകർമ്മാണമീശ്വരം ।

താല്പൎയ്യം വാസ്തുവിദ്യായാ ലിഖിതും തുനിയുന്നു ഞാൻ ॥

വാസ്തുവിദ്യ ആകുന്ന ഗ്രന്ഥത്തെ ചമപ്പാൻ തുടങ്ങുന്നു. അഥാ

യ്യൻ നടെ ഒരു ശ്ലോകംകൊണ്ടു ഇഷ്ടദേവതാനമസ്കാരവും ചികീർഷിതപ്രതിജ്ഞയും ചെയ്യുന്നു.

गजास्यमगजापुत्रं विघ्नाद्रिभिदुर शिवम् ।
नमामि वचसां देवीं मन्दारकुसुमप्रभाम् ॥
प्रणम्य विश्वकर्माणं शिल्पिनां परमेश्वरम् ।
वास्तुविद्यां प्रवक्ष्यामि यथाशक्ति ममामतः ।

നടെ മാനസാധനത്തെ ചൊല്ലുന്നു.

तत्रादौ सम्प्रवक्ष्यामि सर्वेषां मानसाधनम् ।
मानेनैवाखिलं लोके वस्तु संसाध्यते यतः ॥

ഇനി-ലോകത്തുങ്കൽ എല്ലാ വസ്തുവും അളവുകൊണ്ടല്ലൊ നേരാംവണ്ണം അറിയപ്പെടുന്നു അളവു്ഓരോന്നിന്നു് ഓരോ പ്രകാരം എന്നെല്ലൊ ഭേദമുള്ളു എന്നിട്ടു് നടെ ഈ മനുഷ്യാലയത്തുംകൽ വേണുന്നവിററിന്റെ മാനസാധനങ്ങളായുള്ള വിരല്, വിതസ്തി, കോല്, ദണ്ഡ് എന്നിവററെ ചൊല്ലുന്നു—

End :

एवं देवालयादौ च हाटकादिभिरेव वा ।
स्वर्णादिलोष्टमान तु ज्ञेय द्रव्यानुसारतः ॥ इति ॥

ദേവാലയം രാജഭവനം തുടങ്ങിയുള്ളവററിന്നു് ഒട്ടമണ്ണുകൊണ്ടു് തന്നെയല്ലാ അവു.ചെമ്പുകൊണ്ടും വെള്ളികൊണ്ടും പൊന്നുകൊണ്ടും എല്ലാം ആം അവററിന്നു് കനം ഇതു തന്നെ. ദ്രവ്യത്തിന്റെ സുലഭതയ്ക്കു് തക്കവണ്ണമെന്നേയൊള്ളു

Colophon :

इति वास्तुविद्यायां षोडशोऽध्यायः । वास्तुविद्या समाप्ता ।
हरिः ॐ । कृष्णाय नमः ।

Author

Remarks—The Malayālam commentary added to this work is elucidatory

---

## ॥ वास्तुविद्या (भाषातात्पर्योपेता) ॥

## 1130 VĀSTUVIDYĀ

with Bhāṣātātparya

Substance—Palm leaf Size—9″×1½″ Leaves—70. 8 lines per page and 30—34 letters per line Script—Malayālam No of Granthas—1200

Subject—Same as No. 1115 B

Beginning—Same as No. 1129

End ·

लुपामूलं वितानाग्रे तिर्यक्कुक्षौ समालिखेत् ।
लुपाबहळतुल्यं तदायतं परिकीर्तितम् ॥
तस्य तिर्यग्गत चापि वितानवदथालिखेत् ।
निम्न तत् प्रतिकर्तव्य यावद्द्वितयमानतः ॥
तावच्छित्वा परित्याज्यं यावद्वलयमानतः ॥ इति ॥

കഴ്പ്പലകയുടെ വിതാനവരയുടെ തലക്കൽ അകത്തു പാട്ടു മട്ടമിട്ടു ആ വര പോലെ ഒരു വര വരപ്പൂ. ആ വരയ്ക്കു് കഴ്പ്പലകക്കനത്തോളം നീളം അന്നീളം ചെന്നേടത്തു് വിതാനവരപോലെയും ഒന്നു വരപ്പൂ. ആ വിതാനവരയും തൂക്കവരയും കൂടിയ കോണിൽനിന്നു് വിതാനവരവഴി രണ്ടു തൊരകുഴിയുമാറു് കണ്ടുതുടങ്ങി അതിന്നകം തൂക്കിക്കളവൂ.

एवं वलययोर्मध्यं वलयोत्तरयोरपि ।

वलयांपान्तखण्डिन्या तुत्तरे त्रिगुणा स्तुता ॥ इति ॥

രണ്ടു വളകൂടിയതിന്റെ ഇടയും വളയുമുത്തരവും?

Colophon.

इति वास्तुविद्यायां लुपालक्षणं नाम दशमोऽध्यायः ।

Author

Remarks—The Ms comprises the first 10 chapters and 38 stanzas in the 11th.

---

## ॥ वैष्णवनवीकरणप्रकारः ॥

## 1131 VAIṢNAVANAVĪKARAṆAPRAKĀRA

Substance—Palm leaf. Size—9½" 1½" Leaves—27 7 lines per page and 20 letters per line Script—Malayālam No of Granthas—350.

Subject—Renovation of Vaisnava temples.

Beginning:

तत्राभ्यर्चनं .. ... ...

भानुर्मध्यरथेन वाकहृतशादिशियः कुम्भोऽत्र पूर्वं गुरुः ? ।

ब्रह्मश्री.... ....चम्पकाम्रपनम.... ... ...

End

बिम्बे च मण्डपे च बिभज्यान्त देवस्य वेद्य.... नवै हुं....

तेनैव गुरुस्तु कुण्डे ।

पायसार्धेन संभोज्य विप्रसूद्रांश्च दक्षिणाम् ।
होमशिष्टेन चान्नेन बहिर्दिक्षु बलिं हरेत् ॥
आद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशि स्थिताः ।

Colophon

Author

Remarks—The Ms. sets forth the methods of renovating temples etc The leaves are much decayed The following hymn is quoted in the course of the work·

अग्नेर्मन्वे प्रथमस्य प्रचेतसो
यं पाञ्चजन्यं बहवः समिन्धते ।
विश्वस्यां विशि प्रविविशिवांस-
मीमहे स नो मुञ्चत्वंहसः स्वाहा ॥

---

## ॥ शाकल्यमतम् (मनुष्यालयलक्षणम्) ॥

## 1132 ŚĀKALAYAMATAM.

Substance—Palm leaf Size—$12\frac{1}{2}'' \times 2\frac{1}{2}''$ Leaves—5. 11 lines per page and 30—32 letters per line Script—Malayālam. No. of Granthas—100

Subject—Same as No 1115 B.

Beginning·

महागणपतये नमः । अविघ्नमस्तु ।
शाकल्ये भूपरीक्षा—
ईशमिन्द्रादयोर्नीचमुच्चं नैर्ऋतिवरुणयोः ? ।

पुण्यक नाम तद्वास्तु धनपुत्रविवर्धनम् ॥
नीचमिन्द्राग्नयोरुच्चं वारुणवायवौ ? ।
गोमुखं नाम तद्वास्तु पशुबालन्तु? वर्धनम् ।
अग्निभृत्यान्तरे नीचमुच्चं वायुधनेशयोः ।
पिशाचक नाम तद्वास्तु पुत्रनाशं धनक्षयम् ॥

End

പശ്ചിമവേശ്മം ൰൲-കോലെ ൲൰-വിരൽ ഉത്തമം. ൨൮-കോലെ ൮-വിരൽ മദ്ധ്യമം. ൮-കോലെ ൮ൺ വിരൽ കന്യാം. ഉത്തരവേശ്മം ൰൨൰ ൲൮ വിരൽ ഉത്തമം. ൨ൻ-കോൽ മദ്ധ്യമം ൨൯ കോലെ പതിനാറുവിരൽ കന്യാം. ഇതു് ശാകല്യമതം. .

Colophon.

इति शाकल्यमते वास्तुशास्त्रे मनुष्यालये द्वितीयोऽध्यायः ।

Author:

Remarks—The Ms. points out the prominent traits of the site for constructing buildings and the measurements thereof. A leaf at the end is devoted to a *patala* known as *Tālabheda* in Kāsyapīya The leaves are much damaged. The following few lines occur immediately after the colophon

മേഷെ ചോരഃ--വൃഷഭേ ഭോക്താ, മിഥുനേ ശക്തിമാൻ, കൎക്കടകേ ധനവാൻ, സിംഹെ രാജാ, കന്യായാം ക്ലീബഃ, തുലായാം ശൂരഃ, വൃശ്ചികേ ഭാരജീവി, ധന്വായാം പ്രേഷ്യഃ, മകരേ പാപഃ, കുംഭേ ഹിംസ്രഃ, മീനേ അബുദ്ധിഃ, ഇതു അംശകഫലം.

## ॥ शिबिकावक्रवंशलक्षणम् ॥

## 1133. ŚIBIKĀVAKRAVAMŚALAKṢAṆAM.

Substance—Palm leaf. Size—$7\frac{3}{4}'' \times 2\frac{3}{4}''$. Leaves—4. 9 lines per page and 24 letters per line. Script—Malayālam. No of Granthas—50. Incomplete.

Subject—The measurements of the curved bamboo supporting the palanquin.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

अभिवाद्य गणाधीशमभीष्टफलदायिनम् ।
शिबिकावक्रवंशस्य प्रमाणं किञ्चिदुच्यते ॥
वेणोः शुभाङ्कुरं दृष्टं यत्नेन परिपालयेत् ।
वराहशल्लीकीटभङ्गदशाद्युपद्रवात् ॥
दृढया परिवृत्या च वचाचूर्णादिभिः पुनः ।
हस्तोन्नतान् पूर्वमस्य सुमुहूर्ते विनायकम् ॥
संपूज्य जलगन्धाद्यैः सूपलाजादिभिस्तथा ।
वंशस्य पार्श्वयोः खात्वा यन्त्रस्तम्भौ विनिक्षिपेत् ॥

End :

पुनरप्येवमेवैकां सुषिरालिं च कल्पयेत् ।
तयैव गत्वा स्याविद्धाः संभविष्यन्ति वेणवः ॥
वक्राश्वायतमूलाग्रैक्याङ्गुलेष्टादिभिर्हताः (?) ।
ध्वजाद्ययुग्मयोन्याद्या द्विजादिक्रमतः शुभाः ॥

Colophon :

वंशवक्रप्रकरणम् ।

Author ·

Remarks—The Ms. furnishes the details regarding the size of the bamboo used for making the palanquin and the methods of procuring it as curved as is necessary The subject-matter is borrowed from ancient treatises on the subject

---

## ॥ शिल्पग्रन्थाविशेषः (भाषातात्पर्ययुतः) ॥

### 1134 ŚILPAGRANTHAVIŚESA.

Substance —Palm leaf. Size—7″ × 2″ Leaves—23. 12 lines per page and 24 letters per line Script—Grantha No. of Granthas—400.

Subject—Same as No. 1115 B

Beginning

श्रीगणपतये नमः । अविघ्नमस्तु ।

पूर्वं हस्तात् त्रिग्रहस्तत्रिमात्रे
कृत्वा माने तन्यमानेऽतियुक्तम् ।
एवं हस्तादष्टमात्रा पर्वंद्बद्?
एतत् पूर्वमन्यथा तत् क्रमेण ? ॥

ഇതിൻപൊരുൾ മുക്കോലിരുവിരൽ വിസ്താരംവന്ന പ്രാസാദത്തിന്നു് കന്ന്യെന്നെന്നുപേർ അതിൽ 8 വിരൽ ചെയ്യുക്കു. പതിനെഞ്ചുകോലേ പത്തുവിരലോളം മു(ക്കാ॰ക്കോ)ലിരുവിരൽ

പടിഞ്ഞാറേതാം. മുക്കോൽ പത്തുവിരൽ കിഴക്കിനേതാം. കാൽകുറെ നാൽക്കോൽ പടിഞ്ഞാറേതാം നാൽക്കോലിരുവിരൽകിഴക്കിനേതാം നാൽക്കോൽ പത്തുവിരൽ പടിഞ്ഞാറേതാം. കാൽകുറെ അൻകോൽ കിഴക്കിനേതാം

End

ഈശാന്തകോണിൽ പാതിക്കതെക്കേത്തു് അരപ്പദം പർജ്ജന്യന് ജയന്തന് ഒരു പദം. മഹേന്ദ്രനും ആദിത്യനും സത്യകനും ഭൃശനും ഈരണ്ടു പദം. അന്തരിക്ഷന്ന് ഒരു പദം. അഗ്നിക്ക് അരപ്പദം. പൂഷന്നരപ്പദം വി(ഥതേ? തഥെ)ന്ന് ഏ പദം ഗൃഹക്ഷതനും യമനും ഗന്ധർവനും ഭൃംഗരാജനും ഈരണ്ടു പദം മൃഗന്ന് ഒരു പദം. പിതരന്നരപ്പദം ദൗവാര്യകന്നരപ്പദം സുഗ്രീവന്നൊരുപദം. പുഷ്പദന്തനും വരുണനും അസുരനും ശോഷനും ഈരണ്ടു പദം. രോഗന്ന് ഒരു പദം. വായുവിന്ന് അരപ്പദം നാഗന്നരപ്പദം മുഖ്യന്നൊരുപദം. ഫല്ലാടനും സോമനും അർഗ്ഗളനും അദിതിക്കും ഈരണ്ടു പദം. ഉദന്തക്കൊരുപദം ഈശാന്നെന്നരപ്പദം. ഇങ്ങനെ പുറത്തെ 42 ദേവതകൾക്കും പിന്നെ അഷ്ടമൂർത്തികൾ 8 പേർക്കും ഓരോ പദം ഇങ്ങനെ 64 പദത്തി

Author

Remarks—Each verse is commented upon in this Ms. in lucid Malayālam diction. Certain Malayālam technical terms are freely made use of herein

## ॥ शिल्परत्नम् ॥

## 1135. ŚILPARATNAM.

Substance—Palm leaf Size—15" 2". Leaves—140. 10 lines per page and 56 letters per line. Script—Malayālam. No of Granthas—4900. Complete.

Subject—Same as No 1115 B.

Author—Śrīkumāra.

Remarks—The Ms is printed in two parts as Nos. 75 and 98 in TSS. 14 leaves after the 69th are missing.



## ॥ शिवरहस्यम् ॥

## 1136. ŚIVARAHASYAM.

Substance—Palm leaf. Size—14" × 1¼". Leaves—32. 7 lines per page and 36—40 letters per line. Script—Malayālam. No. of Granthas—575.

Subject—Explanation of the modes of worshipping Śiva.

Beginning

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत सर्वविघ्नोपशान्तये ॥

देव्युवाच—

देवदेव महादेव तत्त्वज्ञ करुणानिधे ।

श्रीमत्पञ्चाक्षरी विद्या साक्षान्मोक्षप्रदायिनी ॥
भोगमोक्षप्रदं मन्त्रं ब्रूहि मे परमेश्वर ।

ईश्वर उवाच—

मन्त्राणां सिद्धिदं मन्त्रं कलौ सिद्धिप्रदायकम् ।
रहस्य परमं दिव्यं न देयं यत्रकुत्रचित् ॥
सर्वैश्वर्यप्रदं साक्षाद् ज्ञानैश्वर्यप्रदायकम् ।
अकालमृत्युहरणं सर्वव्याधिनिवारणम् ॥

End

आहुतीभिर्हुनेन्मन्त्री वृक्षपञ्चादिपालनम् ।
स्यन्दनाकर्षणं चैव भवेत् क्षिप्रं न संशयः ॥
आयाति गण्डशैलश्च पर्वतोपरि संस्थितम् ।
नाळिकेरप्रताप च सद्गीतसहतोत्तरम् ? ॥
सहस्रपरिमाणन्तु हुनेन्मन्त्री नगोद्भवे ।
प्रकुर्यात्तदुपर्यज्ञा विषं सर्वं प्रणश्यति (?) ॥

Colophon:

इति शिवरहस्ये मन्त्रकल्पे उमामहेश्वरसंवादे स्कन्दागमरहस्ये पुरश्चरणविधिर्नाम एकत्रिंशोऽध्यायः ।

वल्लीदेवसेनासमेतश्रीसुब्रह्मण्यो रक्षतु । मङ्गळानि भवन्तु । साम्बशिवार्पणमस्तु ।

Author:

Remarks—The leaves are much damaged.

## ॥ शिवरहस्यम् ॥

## 1137. ŚIVARAHASYAM

Substance—Palm leaf. Size—14″ × 1½″. Leaves—30. 7—8 lines per page and 40 letters per line Script—Grantha No of Granthas—575

Subject etc —Same as No 1136

## ॥ शेषसमुच्चयविमार्शिनी ॥

## 1138. ŚESASAMUCCAYAVIMARŚINĪ

Substance—Palm leaf Size—7″ × 1¾″ Leaves—32. 7—8 lines per page and 20—24 letters per line Script—Malayālam. No. of Granthas—350.

Subject—Same as No 1101.

Beginning:

... ... ...मुच्चयश्लोकैरेवाह— देवाग्रे व्रजनयेत्यादि। जननीषु पुरोभागेऽधिवासोक्तपणवकुण्डानि विधाय तेषु यथोचिततत्त्वहोमः कर्तव्यः। ततो यथोक्तप्रकारेण द्रव्यकलशाभिषेकं कुर्यादिति तन्त्रसमुच्चयश्लोकेनाह—

End:

पुनरिन्द्रध्वजान्तर्द्वादशान्तपद्मचन्द्रमण्डलान्तर्भागे सहरळसदि? सकारहकाररेफसहितमतिबीजं विचिन्त्य पिङ्गलादिषु रेचकादीन् विदधत् कुम्भके परतः शिवान् परमशिवान् नादम् इन्दुं सदाशिवमीश्वर हरहरिविधीनहविम्भृशत्सृजतु दग्धा? ... ...

Colophon

इति शेषसमुच्चयविमर्शिन्यां सप्तमः पटलः ।

Author

Remarks—The Ms commences on a fragment of the 6th *patala* and comes to an end with that of the next An identical work in 10 *patalas* is preserved in COL, Trivandrum

---

॥ षडध्वशोधनम् ॥

1139 A. ṢAḌADHVAŚODHANAM

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$ Leaves—5. 8 lines per page and 20 letters per line Script—Malayālam. No of Granthas—50. Incomplete.

Subject—Principles to be observed in *yoga* practice.

Beginning:

गणपतये नमः ।

षडध्वानध्वरे पारे सर्वाङ्गव्यापि... ...रा ।
कोटिसूर्यप्रकाशानां शैवीं शक्तिं विचिन्तयेत् ॥
प्रण... ...हमित्यर्थे नकारः प्रतिषधने ।
मकारे जीव आख्या ..विसर्गः कार्यकारणे ॥
शकारः शश्वदित्यर्थः... ...बोध ईरितः ।
आकारः सदिति प्रोक्त आ... ...द्वैव ईरितः ॥

यका(र,चा?रश्चा)द्वयार्थः स्यात् सर्वो.. ...विवर्जितः ।
ह्लां नमः शिवाय निवृत्त्यात्मने ब्रह्मणे ...
व्यादिपतये नमः । ह्रीं नमः शिवाय ... ...
प्रतिष्ठा.. . .

End :

श्रीभूतिलिपिन्यासं कृत्वा मूलेन लिपिन्यासं कृत्वा अङ्गुष्ठादिकनिष्ठान्तञ्च करतलयोरस्त्रञ्च विन्यस्य देहन्यासमपि विधाय अङ्गान्यपि च विन्यस्य वक्त्रन्यासं कृत्वा ऋषिच्छन्दोदेवताश्च विन्यस्य बीजशक्ति क्षेत्रबीजकीलजीवाधिष्ठानप्रकृतितत्त्ववर्णस्वरादीनपि यथावत् संस्मृत्य न्यासविशेषानारभेत ।

ओं । हरिः ।

Author ·

Remarks—The leaves are much decayed. The opening Fol is numbered 21.

—— —

## ॥ वैद्यविषयः ॥

### 1139 B VAIDYAVIṢAYA.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{3}{4}''$ Leaves—10. 8 lines per page and 20 letters per line Script—Malayālam No. of Granthas—100. Incomplete.

Subject—Medicine

Beginning:

पलाशपुष्पस्य रसमृतुस्नाता च कामिनी ।
संपीत्वा तक्रसहितं गर्भध्वंसो भविष्यति ॥
नीलोत्पलमुशीरश्च मधुकं नागकेसरम् ।
शारिबा हिम्विरश्च समभागानि कारयेत् ॥
एतत्सर्वं समानीय अजाक्षीरेण पेषयेत् ।
शीर्यमाणेषु केशेषु केशस्थाप(न)मुत्तमम् ॥
अश्वबन्धं ... ...कषाये क्वथितं शीतळ पयः ।
पीत्वा कान्तसमा ... ... हतौ वन्ध्या प्रसूयते ॥

End:

रोगं क्षणाद्धन्याद् वृक्षाश ... ..- मली ... ... शुण्ठी चित्रकं वृ ... . तस्मात्पसेकं विचक्षणः । नश्यन्ति सर्वे . . च विशेषतः तस्या ग्रहणमन्त्रं ... ...रुद्राय इन्द्रबन्धो विष्णुबन्धो ... ... तबन्धो रुद्रस्य तेजसा बन्धो न बन्धा .. ... ओं कुरु कुरु महाबल तीक्ष्णदंष्ट्र खन विखन स्वन मन्त्र आ . . लिवेलेन स्वाहा भक्षणमन्त्रम् ।

Colophon·

Author

Remarks—The script is not quite legible owing to the decayed condition of the leaves All details regarding safe-delivery, cure of fever, leprosy etc. are set forth in the course of t' work and hence the title *Vaidyavisaya*.

## ॥ षड्विद्यागमः (सांख्यायनतन्त्रम्) ॥

## 1140 SAḌVIDYĀGAMA.

Substance—Palm leaf Size—$14\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—24. 8 lines per page and 32 letters per line Script—Malayālam. No of Granthas—325

Subject—The application of *mantras* assigned to *Brahmāstra* etc

Beginning

श्रीमहागणपतये नमः ।

मध्येसुधाब्धि मणिमण्डपरत्नवेद्यां
सिंहासनोपरि गतां परिपीतवर्णाम् ।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥

कैलासशिखरासीनं देव्या वामाङ्कसंस्थिता (?) ।
भारतीपतिवान्मीकी सौंस्तौमि चेष्टताद् ॥ (?)
दिक्पालकेशाष्टवसुविघ्नचाष्टकसंस्तुतम् ।
भैरवाष्टवृत देवं मातृमण्डलवेष्टितम् ॥
महापाशुपताक्रान्तं प्रमथैरावृतं प्रभुम् ।
नत्वा स्तुत्वा कुमार(श्च?)श्च इदं वचनमब्रवीत् ॥
चापचर्यासु निपुणैर्युद्धचर्याभयंकरैः ।
नानामायाविनं चैव जेतुमिच्छामि राक्षसम् ॥

End

तस्याज्ञया जगत् सर्वं स्थावरं जङ्गमात्मकम् ।
कुमारस्त (?) प्रकर्तव्यं मन्त्राश्चर्यकर भुवि ॥

जपं चतुर्विधं चोक्त्वा एतन्मन्त्रस्य जापके ।
इच्छया वर्त्तते सर्वमाश्चर्यक्रमादरात् ।
किं तस्य जीवयुक्तानि माहात्म्यश्चेदृश मनोः ॥
गोपायेन्मन्त्रमेतद्धि क्रौञ्चभेदनकोविद ।

Colophon

इति षड्विंश्यागमे पञ्चदशः पटलः ।

Author

Remarks—The Ms discloses how Paramaśiva imparts at the request of Subrahmanya the methods of application (प्रयोग) and withdrawal (उपसंहार) of the *mantras* assigned to *Brahmāstra* etc. for the achievement of success in battle. The work is noticed on p 680, CC.

---

## ॥ सुप्रभेदम् ( प्रतिष्ठातन्त्रम् ) ॥

### 1141 SUPRABHEDAM

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 2''$. Leaves—17 5—7 lines per page and 40 letters per line. Script—Malayalam No of Granthas—250.

Subject—Śaiva Tantra

Beginning

हरिः । श्रीगणपतये नमः । विनायकचोद्यम् । ईशोत्तरम् ।
ईश्वर उवाच—

अथातः संप्रवक्ष्यामि अध्वानं च समासतः ।
अध्वानं षड्विधं प्रोक्त तत्त्वादध्वा विनायक ॥
तत्त्वाध्वा प्रथमं विद्धि भुवनाध्वा द्वितीयकम् ।
मन्त्राध्वा वै तृतीयं तु वर्णाध्वा तु चतुर्थकम् ॥
पदाध्वा पञ्चमं ज्ञेयं कलाध्वा षष्ठमं स्मृतम् ।
षड्विधैरध्वभिर्मार्गैः संविशेदेकमित्वरम् ॥
तत्त्वाध्वानं समासेन भूकटाहादिक शृणु ।
पृथिव्यादीनि मायान्तमध्वानं वर्ण्यते क्रमात् ॥

End :

इत्येवं षड्विधाध्वान ज्ञात्वा यः पाशहा स्मृतः ।
ज्ञानपादं समासेन प्रोक्तमेक विनायक ॥

शिवसृष्टिमार्गं पशुसृष्टिमार्ग-
मध्वानमेवं ह्यखिलं समासात् ।
ज्ञानाख्यपादं सकलं तु विघ्न
प्रोक्त त्विदं मोक्षकर पवित्रम् ॥
पूर्वं क्रियापादमथ प्रचार्य
योगं यथाज्ञानमशेषमुक्तम् ।
संक्षेपतस्तत्तव भक्तिपूर्वं
तथा समाप्त त्वथ सुप्रभेदम् ॥

Colophon.

इति सुप्रभेदे प्रतिष्ठातन्त्रे क्रियापादे अध्वविधानस्तृतीयः पटलः । इति सुप्रभेदं समाप्तम् ।

Author

Remarks—The opening leaf is numbered 40 and

the last, 57 and so the Ms. may be a detached portion of another work Notwithstanding the remark, 'क्रियापादे ३ पटलाः । सुप्रभेदं समाप्तमित्यन्ते दृश्यते' occurring in the Revised Catalogue MPL, this Ms. contains . only the 3rd *patala* of *Suprabhedatantra* dealing with Kriyāpāda The work is noticed on p 726 CC

---

## ॥ हारिणी ( विष्णुसंहिताव्याख्या ) ॥

### 1142 HĀRIṆĪ

Commentary on Visnusamhitā.

Substance—Palm leaf Size—28½″ × 1⅝″. Leaves—277. 6—7 lines per page and 96—110 letters per line. Script—Malayālam No of Granthas—11600.

Subject—Same as No. 1090.

Beginning :

अविघ्नमस्तु ।

श्रीगुरुभ्यो नमः प्राग्भ्यो निर्मलेभ्यः प्रकुर्महे ।
पत्ये गणानां दम्पत्योरपत्याय च दिव्ययोः ॥
स्थूलात् स्थूलतरः सूक्ष्मादपि सूक्ष्मतरः प्रभुः ।
यः परस्मात् परतरस्तस्मै स्ताद्विष्णवे नमः ।
नमस्तस्मै सुमतये यो दिव्यां विष्णुसंहिताम् ॥
आविश्चक्रे भुवश्चक्रे गङ्गामिव भगीरथः ।

सुमतेः संहितार्थो यः सूर्यकेन प्रकाशितः ॥
मयायमुल्मुकेनेव प्रकाश्य इति हास्यताम् ।
यत्नादर्थोच्च रत्नैर्महितसुमतिसह्याद्रिराजावतीर्णा
गा(ढा ? ढे)ना(ते ? मै)र्मयाप्तां ह(त ?रि)पदजलधिं संहिता-
[ताम्रपर्णीम् ।
तारं हारं वहन्ती चित्तमति(?)सुमुखी चारुमध्या विदग्धैः
प्रे(क्षया?क्ष्या)व्याख्यावधूटी जयति शुभपदा हारिणी-
[नामधेया ॥

End

दीक्षाविधौ स्त्रीशूद्राणामेव न केवलं वैदिकमन्त्रानधिकारात् तन्त्रमन्त्राः स्वीकर्तव्याः । वैश्यक्षत्रिययोरपि त एव तारतम्येन स्वीकर्तव्याः । ब्राह्मणस्य तु वैदिकमन्त्रा इत्याह मूलमन्त्रैरिति । तत्र स्त्रीशूद्रविशां मूलमन्त्रेष्वेकः नृपस्य विष्णुगायत्रीति विभागः । सर्वमिति । विप्रे मूलमन्त्रत्रयं गायत्री वैदिकमन्त्राश्चेत्यर्थः । अत्र विप्रो गायत्रीद्वयमूलमन्त्रत्रयक्रमप्रयोगोऽभिप्रेतः । होमादिष्विति स्वमन्त्रा उक्ताः । मूलविष्णुगायत्रीसवितृगायत्रीरूपाः स्वमन्त्राः ।

Colophon

इति नारायणविरचितायां हारिण्याख्यायां विष्णुसंहिताव्याख्यायाम् अष्टाविंशतिः पटलः ।

Author—Nārāyaṇa

Remarks—The work abruptly ends on the middle of the 29th *paṭala* The original has been printed as No 85 in TSS A few *paṭalas* are copied again towards the end

## ॥ हारिणी (विष्णुसंहिताव्याख्या) ॥

## 1143 HĀRINĪ

### Commentary on Visnusamhita

Substance—Palm leaf. Size—15″ × 2″. Leaves—117. 9—11 lines per page and 56—64 letters per line Script—Grantha and Malayālam No of Granthas—4650

Subject—Same as No 1090.

Beginning—Same as No 1142

End :

कृताचार्यस्तु होमयेदित्यत्र तुशब्द एवार्थः । वाशब्द उत्तरार्धादाकृतिं येष्टव्यः ? । तत्राधिवासविषये आचार्य एव वा होमयेदिति सम्बन्धः । वैशब्दो मुख्यत्व सूचयति । यतः सर्वार्थे स्वयमाचार्यैव जुहोतीति पटलमुपमहरति इति विष्णुसंहितायां बिम्बशुद्धिप्रतिपादकः पटलः षोडशोऽतीत इत्यर्थः ।

Colophon ·

इति नारायणविरचितायां विष्णुसंहिताया व्याख्यायां हारिण्याख्यायां षोडशः पटलः ।

Author—Same as No. 1142.

Remarks—The first 27 leaves are written in grantha script and the remaining in Malayālam. The work is a masterly commentary on *Visnusamhitā.* Only 16 *patalas* are commented upon herein.

# ॥ स्तुतयः ॥

## ॥ अच्युतशतकम् (प्राकृतम्) ॥

## 1144 A. ACYUTAŚATAKAM.

Substance—Palm leaf. Size—7″ × $1\frac{1}{2}$″. Leaves—29. 8 lines per page and 24 letters per line. Script—Malayālam No. of Granthas—350.

Subject—A panegyric of Viṣṇu.

Beginning:

हरिः । श्रीगणपतये नमः ।

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
श्रीमते वेदान्तगुरवे नमः ।
णमह त्तिअसाण णाहं सच्चं दासाण अच्चअं ठिरं जोइम् ।
गळुअनईतडतमाळअहिन्दणअरोसहाअळेक्कगइंदम् ॥
नमत त्रिदशानां नाथ सत्य दासानामच्युतं स्थिरं ज्योतिः ।
गरुडनदीतटतमालमहीन्द्रनगरौषधाचलैकगजेन्द्रम् ॥

End:

नअसच्चपत्तणाणि अ
गलिअकिळाअब्भमणिअकुमारंवि णिपो
ओज्जन्तजौव्वणवहुं
वरोव्व मं ळहसु मंतिअणविण्णुविअं ॥
नतसत्यकणाहित ?
गळितकिरातभ्रमनिजकुमारमिव नृपम् ।

भविष्यद्यौवनवधुं

वर इव मां लभस्व मन्त्रिजनविज्ञापितम् ॥

Colophon :

इअ कवितक्कि‌अकेसळ-

वेअंताअरिअवेंकडेसविरइअं ।

सुभअ अच्चयसअअं

सहिअअहिअएसु सोहल समग्गगुणम् ॥

इति कवितार्किककेसरि-

वेदान्ताचार्यवेङ्कटेशविरचितम् ।

सुभगमच्युतशतकं

सहृदयहृदयेषु शोभतां समग्रगुणम् ॥

Author—Vedāntācārya Venkateśa

Remarks—The work is in *Prakrit* dialect The Sanskrit rendering is also furnished at the close of the text. The work is identical with R. No. 366 (g), TCM. Madras Vol I Part I. Skt. B and is composed in praise of Devanātha of Tiruvāhīndrapuram, South Arcot.

---

## ॥ दयाशतकम् ॥

## 1144 B. DAYĀŚATAKAM.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—21. 7 lines per page and 24 letters per line. Script—Malayālam. No. of Granthas—200, Complete,

Subject—Same as No. 1144 A.

Beginning :

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
प्रपद्ये तं गिरिं प्रायः श्रीनिवासानुकम्पया ।
इक्षुसारस्रवन्त्येव यन्मूर्त्या शर्करायितम् ॥
विगाहे तीर्थबहुलां शीतलां गुरुसन्ततिम् ।
श्रीनिवासदयाम्भोधिपरीवाहपरम्पराम् ॥
कृतिनः कमलाकान्तकारुण्यैकान्तिनो भजे ।
धत्ते यत्सूक्तिरूपेण त्रिवेदी सर्वयोग्यताम् ॥
पराशरमुखान् वन्दे भगीरथनये स्थितान् ।
कमलाकान्तकारुण्यगङ्गाप्लावितमाद्विधान् ॥
अशेषविघ्नशमनमनीकेश्वरमाश्रये ।
श्रीमतः करुणाम्भोधौ शिक्षास्रोत इवोत्थितम् ॥
समस्तजननीं वन्दे चैतन्यस्तन्यदायिनीम् ।
श्रेयसीं श्रीनिवासस्य करुणामिव रूपिणीम् ॥
वन्दे वृषगिरीशस्य महिषीं विश्वधारिणीम् ।
त्वत्कृपा प्रतिघातानां क्षमया वारणं यया ॥
निशामयतु मां नीला यद्भोगपटलैर्ध्रुवम् ।
भावितं श्रीनिवासस्य भक्तदोषेष्वदर्शनम् ॥
कमप्यनवधिं वन्दे करुणावरुणालयम् ।
वृषशैलतटस्थानां स्वयं व्यक्तिमुपागतम् ॥
आकिञ्चननिधिं सूतिमपवर्गत्रिवर्गयोः ।
अञ्जनाद्रीश्वरदयामभिष्टौमि निरञ्जनम् ॥
अनुचरशक्त्यादिगुणामग्रेसरबोधविरचितालोकाम् ।
स्वाधीनवृषगिरीशां स्वयं प्रभूतां प्रमाणयामि दयाम् ॥

End

कामं सन्तु मिथः करम्बितगुणाब्रद्यानि पद्यानि न-
स्तस्यास्मिन् शतके सदम्बुकतके दोषश्रुतिं क्षाम्यति ।
निष्प्रत्यूहवृषाद्रिनिर्झरझरत्कारच्छलेनोच्चल-
द्दीनालम्बनदिव्यदम्पतिदयाकल्लोलकोलाहलः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

Colophon :

दयाशतकस्तोत्रं संपूर्णम् ।

Author—Same as No. 1144 A

Remarks—The author invokes the mercy of Śrīnivāsa of Tiruppati.

---

॥ आत्मार्पणस्तवः ॥

## 1145. ĀTMĀRPAṆASTAVA.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—7. 9—10 lines per page and 30 letters per line. Script—Malayālam. No. of Granthas—115. Complete.

Subject—Dedication of one's self and actions to *Paramātma*.

Beginning

हरिः ।

कस्ते बोद्धुं प्रभवति परं देवदेव प्रभावं
यस्मादित्थं विविधरचनासृष्टिरेषा बभूव ।

भक्तिग्राह्यस्त्वमिति भगवंस्त्वामहं भक्तिमात्रात्
स्तोतुं वाञ्छाम्यतिमहदिदं साहसं मे सहस्व ॥

क्षित्यादीनामवयववता निश्चितं जन्म तावत्
तन्नास्त्येव क्वचन कलितं कर्त्रधिष्ठानहीनम् ।
नाधिष्ठातुं प्रभवति जडो नाप्यनीशस्वभाव-
स्तस्मादाद्यस्त्वमसि जगतां नाथ जाने विधाता ॥

End :

उदरभरणमात्रं साध्यमुद्दिश्य नीचे-
ष्वसकृदुपनिबद्धामाहितोच्छिष्टभावाम् ।
अहमिह नुतिभङ्गीमर्पयित्वोपहार
तव चरणसरोजे तात जातोऽपराधी ॥

सर्वं सदाशिव सहस्व ममापराधं
मग्नं समुद्धर महत्यमुमापदब्धौ ।
सर्वात्मना तव पदाम्बुजमेव दीनः
स्वामिन्ननन्यशरणः शरण व्रजामि ॥

आत्मार्पणस्तुतिरियं भगवन्निबद्धा
यद्यप्यनन्यमनसा न मया तथापि ।
वाचा ... केवलमयं शरणं वृणीते
दीनो वराक इति रक्ष कृपानिधे माम् ॥

Colophon

अप्पय्यदीक्षितकृता आत्मार्पणस्तुतिः समाप्ता ।
शिवाय परब्रह्मणे नमः ।

Author—Appayyadīkṣita,

Remarks—This Ms. is available in print at the N. S. Press, Bombay The front Fol. is numbered 53 and the last 59.

---

## ॥ आत्मार्पणस्तवः ॥

### 1146 A. ĀTMĀRPAṆASTAVA.

Substance—Palm leaf. Size—$5\frac{1}{4}'' \times 2''$. Leaves—3. 11 lines per page and 18 letters per line. Script—Malayālam. No. of Granthas—30. Complete.

Subject—Same as No. 1145.

Beginning :

अविघ्नमस्तु ।

नमो विरिञ्चविष्ण्वीशभेदेन परमात्मने ।
प्रपञ्चसर्गसंस्थानसंहृतिव्यक्तमूर्तये ॥
नमश्चतुर्धा प्रोद्भूतभीमभूमात्मने नमः ।
भूरिभारार्त्तिसंहर्त्रे भूतनाथाय शूलिने ।
विश्वग्रासाय विकसत्काळकूटविषाशिने ।
तत्कळङ्काङ्कितग्रीवनीलकण्ठाय ते नमः ॥

End :


नमोऽस्तु योगिध्येयाय नमोऽस्त्वध्यात्मरूपिणे ।
भुक्तिप्रदाय भक्तानां नमस्ते मुक्तिदायिने ॥
मनोवाक्कायचेष्टाः स्युर्ध्यानस्तुतिनमस्क्रियाः ।
देवेश कर्म सर्वं मे भवेदाराधनं तव ॥

Colophon

आत्मार्पणस्तोत्रं समाप्तम् ।

Author—Appayyadīkṣita (?)

Remarks—The work differs much from No. 1145. No internal evidence is available to determine the identity of the author though the Revised Catalogue MPL ascribes it to Appayyadīkṣita.



## ॥ कृष्णस्तवः ( भागवतगतः ) ॥

## 1146 B. KṚṢṆASTAVA.

Substance—Palm leaf Size—5¼″ × 2″. Leaves—3½. 10 lines per page and 16 letters per line Script —Malayālam. No of Granthas—35 Complete.

Subject—Same as No 1144 A

Beginning:

अक्रूरः —

नतोऽस्म्यहं त्वाखिलहेतुहेतुं
नारायणं पूरुषमाद्यमव्ययम् ।
यन्नाभिजातादरविन्दकोशाद्
ब्रह्माविरासीद् यत एष लोकः ॥

भूस्तोयमग्निः पवनः खमादि-
र्महानजादिर्मन इन्द्रियाणि ।
सर्वेन्द्रियार्था विबुधाश्च सर्वे
ये हेतवस्ते जगतोऽङ्गभूताः ॥

End

नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ।
पुरुषेशप्रधानाय ब्रह्मणेऽनन्तशक्तये ॥
नमस्ते वासुदेवाय सर्वभूतक्षयाय च ।
हृषीकेश नमस्तेऽस्तु प्रपन्नं पाहि मां विभो ॥

Colophon:

इति श्रीभागवते दशमस्कन्धे एकचत्वारिंशो-ऽध्यायः ।

श्रीशुकः—

स्तुवतस्तस्य भगवान् दर्शयित्वा जले वपुः ।
भूयः समहरत् कृष्णो नटो नाट्यमिवात्मनः ॥

श्रीकृष्णाय नमः ।

Author—Śrī Vedavyāsa

Remarks—The work is printed in N. S. Press, Bombay

---

## ॥ कृष्णानुस्मृतिः ॥

### 1146 C. KṚṢṆĀNUSMṚTI

Substance—Palm leaf Size—5¼″ × 2″. Leaves—7. 11 lines per page and 18 letters per line. Script—Malayālam. No of Granthas—95. Complete.

Subject—Same as No. 1144 A.

Beginning:

श्रीमहागणपतये नमः ।

युधिष्ठिर उवाच—

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
प्रयाणकाले किं ज(ल्प्यं?प्यं)मोक्षिभिस्तत्त्वचिन्तकैः ॥
किन्तु स्मरन् कुरुश्रेष्ठ! मरणे पर्युपस्थिते ।
प्राप्नुयात् परमां सिद्धिं श्रोतुमिच्छामि तत्त्वतः ॥

श्रीभीष्म उवाच—

सद्युक्तिसहितः सूक्ष्म उक्तः प्रश्नस्त्वयानघ ।
शृणुष्वावहितो राजन्नारदेन पुरा श्रुतम् ॥

End:

नारायणमृषिं देवं दश वर्षाण्यनन्यभाक् ।
इदं जपन् वै प्राप्नोति तद्विष्णोः परमं पदम् ॥
किं तस्य बहुभिर्मन्त्रैर्यस्य भक्तिर्जनार्दने ।
नमो नारायणायेति मन्त्रः सर्वार्थसाधकः ॥

इमां रहस्यां परमामनुस्मृति-
मधीत्य बुद्धिं लभते च नैष्ठिकीम् ।
विहाय दुःखान्यवमुच्य सङ्कटात्
स वीतरागो विचरेन्महीमिमाम् ॥

Colophon.

इति श्रीमहाभारते शान्तिपर्वणि मोक्षधर्मे विष्णुनारदसंवादे कृष्णानुस्मृतिर्नाम षट्त्रिंशोऽध्यायः । श्रीकृष्णाय परब्रह्मणे नमः । ശ്രോമോരാമി സമാപ്തം ।

Author—Śrī Vedavyāsa.

Remarks—The Ms. is available in print at Kumbhakonam. The work forms a chapter on Mokṣadharma, in the Śāntiparva of the Mahābhārata.

---

## ॥ महिम्नःस्तवः ॥

### 1146 D. MAHIMNASTAVA.

Substance—Palm leaf. Size—$5\frac{1}{4}'' \times 2''$. Leaves—7. 10 lines per page and 18 letters per line. Script—Malayālam. No of Granthas—80 Complete.

Subject—A panegyric of Śiva

Beginning:

श्रीमहागणपतये नमः । अविघ्नमस्तु ।

महिम्नः पारं ते परमविदुषो यद्यसदृशी

स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।

अथावाच्यः सर्वस्वमतिपरिणामावधि गृण-

न्ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥

अतीतः पन्थानं तव हि महिमा वाङ्मनसयो-

रतद्व्यावृत्त्या यच्चकितमभिधत्ते श्रुतिरपि ।

स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः

पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥

End:

अहरहरनवद्य धूर्जटेः स्तोत्रमेतत्

पठति परमभक्त्या शुद्धचित्तः पुमान् यः ।

स भवति शिवलोके रुद्रतुल्यः स चेह

प्रचुरपशुधनायुःपुत्रवान् कीर्तिमांश्च ॥

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले:
प्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकलगणवरिष्ठः पुष्पदन्ताभिधानो
रुचिरमलघुवृत्तं स्तोत्रमेतच्चकार ॥

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्व गुरोः परम् ॥

याचेऽहं याचेऽहं शिव तव चरणारविन्दयोर्भक्तिम् ।
याचेऽहं याचेऽहं पुनरपि (च?) तामेव तामेव ॥

Colophon

साम्बाय परब्रह्मणे नमः । शुभमस्तु । श्रीकृष्णाय परब्रह्मणे नमः । ശ്രീമഹാദേവി സഹായം ।

Author—Puspadanta.

Remarks—The work is printed in Bombay It is a part of *Bṛhatstotraratnākara.* The printed edition and this work differ in the arrangement of verses, apart from a few additional *ślokas* in the former

---

## ॥ कृष्णस्तवराजः ॥

### 1146 E KRSNASTAVARĀJA

Substance—Palm leaf. Size—$5\frac{1}{4}'' \times 2''$. Leaves—11 11 lines per page and 18 letters per line. Script—Malayālam No. of Granthas—140. Complete.

Subject—Same as No. 1144 A.

Beginning:

श्रीमहागणपतये नमः । अविघ्नमस्तु ।

जनमेजय उवाच—

शरतल्पे शयानस्तु भारतानां पितामहः ।
कथमुत्सृष्टवान् देहं कं च योगमधारयत् ॥

श्रीवैशम्पायन उवाच—

शृणुष्वावहितो राजन् शुचिर्भूत्वा समाहितः ।
भीष्मस्य कुरुशार्दूल देहोत्सर्गं महात्मनः ॥

End·

यं योगिनः प्राणवियोगकाले
यत्नेन चित्ते विनिवेशयन्ति ।
स त पुरस्ताद्धरिमीक्षमाणः
प्राणान् जहौ प्राप्तफलो हि भीष्मः ॥

स्तवराजः समाप्तोऽयं कृष्णस्याद्भुतकर्मणः ।
गाङ्गेयेन पुरा गीतो महापातकनाशनः ॥

इमं नरः स्तवराजं मुमुक्षुः
पठन् शुचिः कलुषितकल्मषापहम् ।
अतीत्य लोकानमलान् सनातनान्
पदं स गच्छत्यमृतं महात्मनः ॥

Colophon:

इति श्रीमहाभारते शान्तिपर्वणि राजधर्मे श्रीकृष्णस्तवराजो नाम सप्तचत्वारिंशोऽध्यायः । श्रीकृष्णाय परब्रह्मणे नमः ।
ഒസാമമശ്രീ സഹായം ।

Author—Śrī Vedavyāsa.

Remarks—The text is borrowed from *Śāntiparva* of the Mahābhārata. It is printed in N. S. Press, Bombay.

---

## ॥ माधवस्तवराजः ॥

## 1146 F. MĀDHAVASTAVARĀJA.

Substance—Palm leaf. Size—5¼"×2" Leaves—9. 11 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—100. Complete.

Subject—Same as No. 1144 A.

Beginning:

गालवः—

यः स्नाति माधवप्रीत्यै प्रातर्माघे बहिर्जले ।
सम्पूज्य मालतीपुष्पैर्विष्णुलोकमवाप्नुयात् ॥
गीतापाठं तु यः कुर्यात् प्रातर्माघे जलाप्लुतः ।
तस्य पुण्यफलं वक्तु विष्णुनापि न शक्यते ॥
विभूतिं विश्वरूप च यश्चाध्यायद्वय पठेत् ।
तस्य पुण्यस्य विस्तारं वदतो मे निशामय ॥
विभूतिविश्वरूपोत्थं यः पाद पठते नरः ।
माघे पापैर्विनिर्मुक्तो दिवि देवैश्च गीयते ॥
श्लोकार्धं पठते यस्तु माघे मासि जलाप्लुतः ।
स सप्तकुलमुद्धृत्य स्वर्गलोके महीयते ॥

End :

माधवस्तवराजं तु यः पठेत् प्रयतः शुचिः ।
स पुमान् त्रिषु लोकेषु स एव स्याज्जनार्दनः ॥
पठनात् स्तवराजस्य निग्रहादि वृथा भवेत् ।
माधवस्तवराजोऽयं पापगुल्मदवानलः ॥
धर्मादिमोक्षपर्यन्तपुरुषार्थस्य कारणम् ।
यः पठेत् पुण्यकाले तु स्तवराजं महामनुम् ॥
कल्पकोटिसहस्रेषु मोदते विष्णुमन्दिरे ।

Colophon :

इति श्रीवायुपुराणे माघमाहात्म्ये माधवस्तवराजो नाम पञ्चविंशोऽध्यायः । श्रीकृष्णाय परब्रह्मणे नमः ।
ഗോമേദപതി സഹായം ।

Author—Vedavyāsa.

Remarks—The text is borrowed from *Vāyupurāna*. It starts with the excellencies of the *Māghasnāna Gītā* and the *Bhāgavata*. Then are commenced the panegyrics of Mādhava.

---

## ॥ गजेन्द्रमोक्षः ॥

### 1146 G. GAJENDRAMOKṢA.

Substance—Palm leaf. Size—$5\frac{1}{4}'' \times 2''$. Leaves—10. 11 lines per page and 18 letters per line Script—Malayālam. No. of Granthas—120 Complete.

Subject—Same as No. 1144 A.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीशुकः—

आसीद् गिरिवरो राजस्त्रिकूट इति विश्रुतः ।
क्षीरोदेनावृतः श्रीमान् योजनायुतमुच्छ्रितः ॥
तावता विस्तृतास्तिर्यक् त्रिभिः शृङ्गैः पयोनिधिम् ।
दिशश्च रोचयन्नास्ते रौप्यायसहिरण्मयैः ॥
अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रितैः ।
नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झराम्भसाम् ॥

End:

ये मां स्तुवन्त्यनेनाङ्ग प्रतिबुध्य निशात्यये ।
तेषां प्राणात्यये चाहं ददामि विमलां गतिम् ॥
इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमम् ।
हर्षयन् विबुधानीकमारुरोह खगोत्तमम् ॥

Colophon:

इति श्रीभागवते अष्टमस्कन्धे चतुर्थोऽध्यायः ।

श्रीशुकः—

राजन्नुदितमेतत्ते हरेः कर्माघनाशनम् ।
गजेन्द्रमोक्षणं पुण्यं रैवतं त्वन्तरं शृणु ॥

शुभमस्तु । श्रीकृष्णाय परब्रह्मणे नमः । ഭഗവാൻ സഹായം ।

Author—Vedavyāsa.

Remarks—The text is borrowed from the 8th *Skandha* of the *Bhāgavata*.

## ॥ विष्णुपादादिकेशान्तस्तवः ॥

## 1146 H VISNUPĀDĀDIKEŚĀNTASTAVA.

Substance—Palm leaf Size—5¼″ × 2″ Leaves—11. 11 lines per page and 18 letters per line Script—Malayālam. No of Granthas—130 Complete.

Subject—Same as No 1144 A

Beginning

अविघ्नमस्तु ।

लक्ष्मीभर्तुर्भुजाग्रे कृतवसति सितं यस्य रूपं विशालं
नीलाद्रेस्तुङ्गशृङ्गस्थितमिव रजनीनाथबिम्बं विभाति ।
पायान्नः पाञ्चजन्यः स दितिसुतकुलत्रासनैः पूरयन् स्वै-
र्निध्वानैर्नीरदौघध्वनिपरिभवदैरम्बरं कम्बुराजः ॥

आहुर्यस्य स्वरूपं क्षणमुखमखिलं सूरयः कालमेतद्
ध्वान्तस्यैकान्तमन्तं यदपि च परमं सर्वधाम्नां च धाम ।
चक्रं तच्चक्रपाणेर्दितिजतनुगलद्रक्तधारातधारं
शश्वन्नो विश्ववन्द्यं वितरतु विपुलं शर्म घर्मांशुशोभम् ॥

End

मोदात् पादादिकेशस्तुतिमिति रचितां कीर्तयित्वा त्रिधाम्नः
पादाब्जद्वन्द्वसेवासमयकृतनुतिर्मस्तकेनानमेद् यः ।
उन्मुच्यैवात्मनैनोनिचयकवचकं पञ्चतामेत्य भानो-
र्बिम्बान्तर्गोचरं स प्रविशति परमानन्दमानन्दरूपम् ॥

मृद्वङ्घ्रिश्लिष्टजङ्घं विकटकटितटं निम्ननाभिस्थपद्मं
सत्कुक्षिव्यूढवक्षः पृथुलभुजमुरुस्कन्धमुद्दामकण्ठम् ।
बिम्बोष्ठं सुष्ठुगण्डं सितरदमरुणापाङ्गमुत्तुङ्गघोणं
शोणाक्षं सुभ्रु चाच्छालिकलुठदलकं पातु विष्णोर्वपुर्नः ॥

Colophon:

श्रीमत्पादादिकेशस्तुतिः समाप्ता ।

शुभमस्तु । श्रीकृष्णाय परब्रह्मणे नमः । സോമശേഖരി സഹായം ।

Author—Śrīśaṅkarabhagavatpādācārya

Remarks—The work is printed in Śrī Rangam

---

## ॥ भीष्मस्तुतिः ॥

### 1146 I BHĪṢMASTUTI.

Substance—Palm leaf. Size—5¼″ × 2″. Leaves—2. 11 lines per page and 18 letters per line. Script—Malayāḷam No. of Granthas—25.

Subject—Same as No 1144 A

Beginning:

श्रीभीष्मः—

इति मतिरुपकल्पिता वितृष्णा
भगवति सात्वतपुङ्गवे विभूम्नि ।
स्वसुखमुपगते क्वचिद् विहर्तु
प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥
त्रिभुवनकमनं तमालवर्णं
रविकरगौरवराम्बरं दधाने ।
वपुरलककुलावृताननाब्जं
विजयसखे रतिरस्तु मेऽनवद्या ॥

End:

तस्य निर्हरणादीनि सम्परेतस्य भार्गव ।
युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत् ॥

तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः ।
ततस्ते कृष्णहृदयाः स्वाश्रमान् प्रययुः पुनः ॥
ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयम् ।
पितरं सान्त्वयामास गान्धारीं च तपस्विनीम् ॥
पित्रा चानुमतो राजा वासुदेवानुमोदितः ।
चकार राज्य धर्मेण पितृपैतामहं प्रभुः ॥

Colophon

इति श्रीभागवते प्रथमस्कन्धे नवमोऽध्यायः । श्रीकृष्णाय परब्रह्मणे नमः ।

Author—Same as No 1146 B.

Remarks—This work forms the 9th chapter in the 1st *Skandha* of the *Bhāgavata*. It is printed in Bombay.



## ॥ रामभुजङ्गप्रयातम् ॥

## 1146 J. RĀMABHUJANGAPRAYĀTAM.

Substance—Palm leaf. Size—5¼″ × 2″. Leaves—5. 11 lines per page and 18 letters per line. Script—Malayālam No. of Granthas—60. Complete

Subject—A panegyric of Rāma.

Beginning

हरिः । श्रीगणपतये नमः ।

प्रभो पारिजातस्य मूले पवित्रे
विचित्रे सचित्रे शुभे हेमहर्म्ये ।

लसद्रत्नपीठे कृतानामसीता-
समेतोज्ज्वलाकल्प राम प्रसीद ॥
दलत्पद्मनीलोत्पलाभेन्द्रनीलो-
ल्लसत्कुण्डलोन्निद्रपद्मायताक्ष ।
तटिद्दामदायादकौशेयवासः-
समालङ्कृताकार राम प्रसीद ॥

End.

प्रसीद प्रसीद प्रपन्नानुकम्पिन्
प्रसीद प्रसीद प्रसन्नाननाभ ।
प्रसीद प्रसीद प्रचण्डप्रताप
प्रसीद प्रसीद प्रभो रामचन्द्र ॥
भुजङ्गप्रयात परं वेदसारं
मुदा रामचन्द्रस्य भक्त्या च नित्यम् ।
पठन् सन्ततं चिन्तयन् स्वान्तरङ्गे
स एव स्वयं रामचन्द्रः स धन्यः ॥

Colophon.

Author :

Remarks—The work is printed in Śrī Raṅgam. It is composed in *Bhujaṅgaprayāta* metre.

---

## ॥ रामरक्षा ॥

## 1146 K RĀMARAKṢĀ.

Substance—Palm leaf. Size—$5\frac{1}{4}'' \times 2''$. Leaves—2. 12 lines per page and 18 letters per line.

Script—Malayalam. No. of Granthas—25. Complete.

Subject—Same as No. 1146 J.

Beginning

कौशिक ऋषिः । अनुष्टुप् छन्दः । श्रीरामचन्द्रो देवता ।

(इन्दी)वरश्यामलमायताक्ष
धनुर्धरं नीलजटावजूटम् ।
पार्श्वद्वये लक्ष्मणमैथिलीभ्यां
निषेव्यमाणं प्रणतोऽस्मि रामम् ॥

ध्यात्वा नीलोत्पलश्याम राम राजीवलोचनम् ।
जानकीलक्ष्मणोपेतं जटामकुटमण्डितम् ॥

End :

षोडशैतानि नामानि राघवस्य महात्मनः ।
जपंस्त्रिसन्ध्य प्रयतः सर्वत्र विजयी भवेत् ॥

लोकाभिरामं रणरङ्गधीर
राजीवनेत्रं रघुवंशनाथम् ।
कारुण्यमूर्ति करुणाकटाक्षं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥

Colophon :

Author

Remarks—The work is printed at Śrī Raṅgam.

---

## ॥ विष्णुकेशादिपादान्तस्तुतिः ॥

### 1146 L VIṢṆUKEŚĀDIPĀDĀNTASTUTI.

Substance—Palm leaf. Size—5¼″ × 2″. Leaves—4.

11 lines per page and 18 letters per line. Script—Malayāḷam. No of Granthas—40. Complete

Subject—Same as No. 1144 A.

Beginning.

अविघ्नमस्तु ।

मरतकमणिरुचिचोरं मञ्जुरणत्कनककिङ्किणीमधुरम् ।
मम हृदि निवसतु नियतं मङ्गलमङ्गं मुकुन्दस्य ॥
स्मर मानस मौकुन्द मकुटं मणिमण्डितम् ।
केशांश्च सजलाम्भोदनीलकुञ्चितकोमलान् ॥

End

गिरिशेन्द्रादिभिश्चैव सनकाद्यैरभिष्टुतम् ।
उपनन्दसुनन्दाद्यैः पार्षदैरभिवन्दितम् ॥
वीणां वादयमाने तु नारदेऽपाङ्गदायिनम् ।
आह्लादयन्तं प्रह्लादं स्मितचन्द्रिकया स्वया ॥
निशान्ते यः समुत्थाय स्मरेद्देवं जनार्दनम् ।
इहाभिलषितान् प्राप्य मोऽन्ते व्रजति केशवम् ॥

Colophon

Author ·

Remarks—Same as No 1146 K

---

॥ रामस्तवराजः ॥

## 1146 M. RĀMASTAVARĀJA.

Substance—Palm leaf. Size—5¼″ x 2″. Leaves—10,

11 lines per page and 18 letters per line. Script—Malayālam No of Granthas—120. Incomplete

Subject—Same as No 1146 J.

Beginning.

श्रीगणपतये नमः । अविघ्नमस्तु ।

अस्य श्रीरामचन्द्रस्तवराजस्तोत्रमहामन्त्रस्य । सनत्कुमार ऋषिः । अनुष्टुप् छन्दः । श्रीरामचन्द्रो देवता ।

सूतउवाच—
सर्वशास्त्रार्थतत्त्वज्ञ व्यासं सत्यवतीसुतम् ।
धर्मपुत्रः प्रहृष्टात्मा प्रत्युवाच मुनीश्वरम् ॥

युधिष्ठिर उवाच—
भगवन् योगिनां श्रेष्ठ ! सर्वशास्त्रविशारद ! ।
किं तत्त्वं किं परं जप्यं किं ध्यानं मुक्तिसाधनम् ॥

End:

रघुवर तव मूर्तिर्मामके मानसाब्जे
नरकगतिहरं ते नामधेयं मुखे मे ।
अनिशमतुलभक्त्या मस्तके त्वत्पदाब्जं
भवजलधिनिमग्नं रक्ष मामार्तबन्धो ॥

रामरत्नमहं वन्दे चित्रकूटपतिं हरिम् ।
कौसल्याशुक्तिसम्भूतं जानकीकण्ठभूषणम् ॥

Colophon:

इति सनत्कुमारसंहितायां नारदोक्तरामस्तवराजस्तोत्रं समाप्तम् ।

Author:

Remarks—The work forms a portion of *Sanatkumārasamhitā*. It is printed in Bombay.

---

॥ अपराधस्तवः ॥

1146 N. APARĀDHASTAVA

Substance—Palm leaf. Size—$5\frac{1}{4}'' \times 2''$ Leaves—8. 10—11 lines per page and 22 letters per line. Script—Malayālam No. of Granthas—118. Complete.

Subject—A panegyric of Śambhu.

Beginning.

श्रीगणपतये नमः । अविघ्नमस्तु ।

कल्याण कुरुतां नित्यं करिराजमुखं महः ।
अनादियूनोः शिवयोर्यदानन्दैककन्दलम् ।

क्रूर दुष्टतमं विनष्टमनसं भ्रष्टं शठं निष्ठुरं
निर्लज्जं कृपण कृतघ्नमशुचिं बह्वाशिन हिंसकम् ।
आशापाशशतप्रबद्धमनस दुष्कीर्तिभाजं सदा
कारुण्याकर भो पितः पशुपते दोषाकरं पाहि माम् ॥

End:

बन्धच्छेदविधौ त्वमेव भुवनेष्वेकः समर्थो ध्रुवं
त्वत्पाशैर्भवबन्धमेतदखिलं कर्मच्छलेनापि च ।

शम्भो त्वां शरणं गत करुणया त्व शङ्करो येन वा
कारुण्याकर भो पितः पशुपते दोषाकरं पाहि माम् ॥
शुभमस्तु ।

Colophon .

Author

Remarks—A different work with the same title is noticed under R No 10919, DCSM. Madras Vol XIX

---

## ॥ श्रुतिगीता ॥

### 1146 O. ŚRUTIGĪTĀ.

Substance—Palm leaf. Size—$5\frac{1}{4}'' \times 2''$ Leaves—$3\frac{1}{2}$. 10 lines per page and 22 letters per line. Script—Malayalam No. of Granthas—**50.** Incomplete.

Subject—A panegyric of Śri Kisna.

Beginning

जय जयाजित जह्य(ग?ज) जङ्गमावृतिमजामुपनीतमृषागुणाम् ।
नहि भवन्तमृते प्रभवन्त्यमी निगमगीतगुणार्णवता तव ॥
द्रुहिणवह्निरवीन्दुमुखामरं जगदिदं न भवत् पृथगुत्थितम् ।
बहुमुखैरपि मन्त्रगणैरज! त्वमुरुमूर्तिरतो विनिगद्यसे ॥

End :

द्युपतयो विदुरन्तमनन्त ते नच भवान् न गिरः श्रुतिमौलयः ।
त्वयि फलन्ति नमो नम इत्यतो जय जयेति भजे तव तत्पदम् ॥

सर्वश्रुतिशिरोरत्ननीराजितपदाम्बुजम् ।
भोगयोगप्रदं वन्दे माधवं कर्मि नम्रयोः? ॥

Colophon

Author

Remarks—The work is a compendium, in verse, of the Śrutigītādhyāya in the Bhāgavata.

---

## ॥ पञ्चायुधस्तोत्रम् ॥

### 1146 P. PAÑCĀYUDHASTOTRAM.

Substance—Palm leaf Size—$5\frac{1}{4}'' \times 2''$ Leaves—$1\frac{1}{2}$. 10 lines per page and 20 letters per line. Script — Malayālam No of Granthas — 15. Complete

Subject—A panegyric of the five weapons of Vīsnu.

Beginning:

श्रीगणपतये नमः ।

स्फुरत्सहस्रारशिखाभिदीप्तं
सुदर्शनं भास्करकोटितुल्यम् ।
सुरद्विषां प्राणविनाशहेतुं
चक्रं सदाहं शरण प्रपद्ये ॥

विष्णोर्मुखोत्थानिलपूरितस्य
यस्य ध्वनिर्दानवदर्पहन्ता ।
तं पाञ्चजन्यं शशिकोटिशुभ्रं
शङ्खं सदाहं शरण प्रपद्ये ॥

End

इमं हरेः पञ्चमहायुधानां
स्तव पठेद् योऽनुदिन प्रभाते ।
समस्तदुःखानि भयानि सद्यः
पापानि नश्यन्ति सुखानि सन्ति ॥

वने रणे शत्रुजलाग्निमध्ये
यदृच्छयापत्सु महाभयेषु ।
इद पठेत् स्तोत्रमनाकुलात्मा
सुखी भवेत् तैः कृतसर्वरक्षः ॥

Colophon .

Author

Remarks—The work is indentical with R No. 173 J, TCM Madras, Vol I, Part I, A

---

## ॥ परमेश्वरीस्तवः ॥

### 1145 Q PARAMEŚVARĪSTAVA

Substance—Palm leaf Size—$5\frac{1}{4}'' \times 2''$ Leaves—$1\frac{1}{2}$. 11 lines per page and 16 letters per line. Script—Malayālam No of Granthas—18. Complete

Subject—A panegyric of Devī

Beginning

कनत्कनकशैलाग्रे काञ्चने कमलोदरे ।
कर्णिकामध्यमध्यास्य वसन्तीं वासनापराम् ॥

एककालोदितानेककोटिबालार्कसन्निभाम् ।
जपासिन्दूरबन्धूकपद्मरागसमप्रभाम् ॥
ईशादिमौलिमाणिक्यनीराजितपदाम्बुजाम् ।
मञ्जुशिञ्जानमञ्जीरजङ्घाकाकलशोभिताम् ॥

End

लग्नकस्तूरिकामोदकुङ्कुमागरुचन्दनैः ।
चहलालिप्तसर्वाङ्गीं सर्वावयवसुन्दरीम् ॥
हरीन्दुशेखरराजानां श्वे....रूपफलप्रदाम् ।
सर्वसम्पत्समृद्ध्यर्थं त्वां भजे परमेश्वरीम् ॥

Colophon.

Author·

Remarks—The plates covering the codex are made of ivory whereon are engraved the vignette of Kısna and designs of certaın flowers

---

*(To be contınued)*

---